







سری گنیشائے نمہ

ادھر کا پنڈت کسن کا جیو تشم گنگورا پورب کا ہردوا

سری کا رام چندر جی کا بنا ہی پاتیا ہے الوے سری دیکھا

دیا شنکر برگلدھ گنگل سیلی اسا دیا

سمت ۱۹۵۵ دن سومار روبرو

रुतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलं ऊर्द्धलिंगं विरूपा
क्षं विश्वरूप नमो नमः १ रुतं न षष्टं यदा काले षण्मासे
न मरिष्यति सत्यं तु पंचमे मासे परं ब्रह्म चतुर्थके पुरु
षं च तृतीये वै द्वितीये कृष्णपिंगलम् ऊर्द्धलिंगं तु मा
से न विरूपाक्षं तदर्द्धके विश्वरूपं तृतीये ह्नि सद्यैवे
व नमो नमः ॥ प्रसतीक जातकालं कार

ओंकार




गणेश
सरस्वती

रथ ९



ॐनमोभगवतेवासुदेवाय॥ॐअ
स्यश्रीभगवद्गीतामालामंत्रस्य
श्रीभगवान्वेदव्यासऋषिः॥अनु

ष्टुप्छंदः॥ श्रीकृष्णः परमात्मा
देवताः॥ अशोच्यानन्वशोचस्त्वं प्र-
ज्ञावादांश्च भाषसे इति बीजं॥ स

१

वंयमोन्यत्रियज्वमामेकेंशाश्वणब्रजेः

तिशक्तिः॥ श्रहंत्वांसर्वपापेभ्योमोदायि।

ष्यामिमास्तुवः इतिकीलकम्॥ नैवेद्यं

दंतिशाद्यानिनैवेदंहतिपादवकइंपंग।

शाभ्योनमः॥ नचैवेल्केदयंन्यापोनः

शोषयतिमारुतइतितर्जनीभ्यांनमः

अच्छेद्योयमदाह्योयमक्लेद्योशोष्यएवच·

इतिमध्यमाभ्यांनमः॥नित्यःसर्वगतःस्था·

णुरचलोयंसनातनइमनामिकाभ्यांन·

मः पश्यमेपार्थरूपाणिशतशोथ·

गी.
३
१

मह्रस्वप्राइतिकनिष्ठिकाभ्यांनमः॥नाना
विधानिदिव्यानिनानावर्णाकृतीनिचेति
करतलकरपृष्ठाभ्यांनमः॥इतिकरन्यासः
अथहृदयादिन्यासः॥नैनंछिंदंतिशस्त्रा
णीतिहृदयायनमः॥नचैनंक्लेदयंत्याप

इतिशिरसेस्वाहा ॥ अच्छेद्योयमदाह्योयमि
तिशिखायैवषट् ॥ नित्यःसर्वगतःस्था
णुरितिकवचायहुम ॥ पश्यमेपार्थरू
पाणीतिनेत्रत्रयायवौषट् ॥ नानाविधा
निदिव्यानीत्यस्त्रायफट् ॥ श्रीकृष्णप्रीत्य

गी.
५
१

र्थेगीतापाठेविनियोगः॥ अथध्यानं॥ ॐ
पार्थायप्रतिबोधितांभगवतानारायणे
नस्वयम्॥ व्यासेनग्रथितांपुराणमुनिना
मध्येमहाभारते॥ अद्वैतामृतवर्षिणींभ
गवतीमष्टादशाध्यायिनीं॥ अम्बत्वामन

मादधामि भगवद्गीते भवद्वेषिणीम् ॥१
नमोस्तु ते व्यासविशालबुद्धे फुल्लारविं
दायतपत्रनेत्र ॥ येन त्वया भारततैलपू
र्णः प्रज्वालितो ज्ञानमयः प्रदीपः ॥२॥
प्रपन्नपारिजातायतोत्रवेत्रैकपाणये

गी.
प
१

ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥ ३
सर्वोपनिषदो गावो दोग्धा गोपालनंदनः
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं
महत् ॥ ४ ॥ वसुदेवसुतं देवं कंसचाणूर
मर्दनम् ॥ देवकीपरमानंदं कृष्णं वंदे जग


हृतम् ॥ भीष्मद्रोणतटाजयद्रथजलागं
धारनीलोत्पला ॥ शल्यग्राहवतीकृपेण
वहिनीकर्णेनवेलाकुला ॥ अश्वत्थाम
विकर्णघोरमकरादुर्योधनावर्तिनी ॥
सोत्तीर्णाखलुपांडवैःरणनदीकैवर्त

केकेषुवे ॥८॥ पाराशर्यवचस्सरोजममम
लंगीतार्थगंधोत्कटम् ॥ नानाख्यानकके
सरंहरिकथासंबोधनाबोधितम् ॥ लो
केसज्जनषट्पदैरहरहः पेपीयमानंमुदा
भूयाद्भारतपंकजंकलिमलप्रध्वंसिनःश्रे

यमे ॥ ७ ॥ मूकंकरोतिवाचालंपंगुंलंघयते
गिरिम् ॥ यत्कृपातमहंवंदेपरमानंदमाध
वम् ॥ ८ ॥ यंब्रह्मावरुणेंद्ररुद्रमरुतस्तुन्व
तिदिव्यैःस्तवैर्वेदैःसांगपदक्रमोपनिष
दैर्गायंतियंसामगाः ॥ ध्यानावस्थिततद्गतेन

तेनमनसापश्यंतियंयोगिनो॥यस्यांतंन
विदुःसुरासुरगणादेवायतस्मैनमः॥९॥
इतिन्यासः॥धृतराष्ट्रउवाच॥धर्मक्षेत्रेकुरु
क्षेत्रेसमवेतायुयुत्सवः॥मामकाःपांडवा
श्चैवकिमकुर्वतसंजय॥१॥संजयउवाच॥

९



٩

दृष्टातुपांडवानीकंव्यूढंदुर्योधनस्तदा ॥ आ
चार्यमुपसंगम्यराजावचनमब्रवीत् ॥ २
पश्यैतांपांडुपुत्राणामाचार्यमहतींचमूं
व्यूढांद्रुपदपुत्रेणतवशिष्येणधीमता ॥ ३
अत्रशूरामहेष्वासाभीमार्जुनसमायुधि ॥

गी. ८ १

युयुधानो विराटश्च द्रुपदश्च महारथः ॥ धृ
ष्टकेतुश्चेकितानः काशिराजश्च वीर्य-
वान् ॥ पुरुजित्कुंतिभोजश्च शैब्यश्च नरपुं-
गवः ॥ ५ ॥ युधामन्युश्च विक्रांत उत्तमौ-
जाश्च वीर्यवान् ॥ सौभद्रो द्रौपदेयाश्च सर्वे

पंचमहारथाः॥ ६॥ अस्माकंतुविशिष्टाः
येतान्निबोधद्विजोत्तम॥ नायकाममसै
न्यस्यसंज्ञार्थंतान्ब्रवीमिते॥ भवान्भीष्म
श्चकर्णश्चकृपश्चसमितिंजयः॥ अश्वत्था
माविकर्णश्चसौमदत्तिस्तथैवच॥ ७॥ अ

न्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ॥
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदा
अपर्याप्तं तदस्माकं बलं भीष्माभिरक्ष
तम् ॥ पर्याप्तं त्विदमेतेषां बलं भीमाभिर
क्षितम् ॥ ९ ॥ १० ॥ अयनेषु च सर्वेषु यथाभाग

मवस्थिताः॥भीष्ममेवाभिरक्षंतुभवं·
तः सर्वएवहि॥११॥तस्यसंजनयन्हर्षं·
कुरुवृद्धः पितामहः॥सिंहनादंविन
द्योच्चैः शंखंदध्मौप्रतापवान्॥१२॥त
तः शंखाश्चभेर्यश्चपणवानकगोमु

खाः ॥ सहसैवाभ्यहन्यंत स शब्दस्तुमुलो
भवत् ॥ १३ ॥ ततः श्वेतैर्हयैर्युक्ते महति स्यंदने
स्थितौ ॥ माधवः पांडवश्चैव दिव्यौ शंखौ प्र
दध्मतुः ॥ पांचजन्यं हृषीकेशो देवदत्तं धनं
जयः ॥ पौंड्रं दध्मौ महाशंखं भीमकर्मा

वृकोदरः॥१५॥अनंतविजयंराजाकुंतीपु
त्रोयुधिष्ठिरः॥नकुलःसहदेवश्चसुघोष
मणिपुष्पकौ॥काश्यश्चपरमेष्वासःशि
खंडीचमहारथः॥धृष्टद्युम्नोविराटश्च
सात्यकिश्चापराजितः॥१७॥द्रुपदोद्रौपदे

गी.
११
१

याश्चसर्वशःपृथिवीपते॥सौभद्रश्चमहा
बाहुःशंखान्दध्मौपृथक्पृथक्॥सघोषो
धार्तराष्ट्राणांहृदयानिव्यदारयत्॥नभ
श्चपृथिवींचैवतुमुलोव्यनुनादयन्॥१९
अथव्यवस्थितान्दृष्ट्वाधार्तराष्ट्रान्कपिध्व-

जः ॥ प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः २०
हृषीकेशं तदा वाक्यमिदमाह महीपते
सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥ २१
यावदेतान्निरीक्षेहं योद्धुकामानवस्थिता
न् ॥ कैर्मया सह योद्धव्यमस्मिन् रणसमुद्य

गी.

१२

१

मे ॥ योत्स्यमानानवेक्षेहंयएतेत्रसमागता
नाः ॥ धार्त्तराष्ट्रस्यदुर्बुद्धेर्युद्धेप्रियचिकीर्
षवः ॥ २३ ॥ संजयउवाच ॥ एवमुक्तोहृषी
केशोगुडाकेशेनभारत ॥ सेनयोरुभयोर्
मध्येस्थापयित्वारथोत्तमम् ॥ भीष्मद्रोण

प्रमुखतः सर्वेषांच महीक्षिताम् ॥ उवाच॰

पार्थ पश्यैतान्समवेतान्कुरूनिति ॥ २५ ॥

तत्रापश्यत्स्थितान्पार्थः पितॄनथ पिता॰

महान् ॥ आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौ

त्रान्सखींस्तथा ॥ २६ ॥ श्वशुरान्सुहृदश्चैव॰

गी.
१३
१

सेनयोरुभयोरपि ॥ तान्समीक्ष्यसकौन्ते-
यःसर्वान्बंधूनवस्थितान् ॥ कृपयापरया
विष्टोविषीदन्निदमब्रवीत् ॥ अर्जुनउवा
च ॥ दृष्ट्वेमंस्वजनंकृष्णयुयुत्सुंसमुपस्थि
तम् ॥ २८ ॥ सीदंतिममगात्राणिमुखंच

परिशुष्यति॥वेपथुश्चशरीरेमेरोमहर्ष
श्चजायते॥२९॥गांडीवंस्रंसतेहस्तात्त्वक्चै
वपरिदह्यते॥नचशक्नोम्यवस्थातुंभ्रम
तीवचमेमनः॥३०॥निमित्तानिचपश्या
मिविपरीतानिकेशव॥नचश्रेयोनुप

गी.
५
१

ष्यामि हत्वा स्वजनमाहवे ॥३१॥ न कां
क्षे विजयं कृष्ण न च राज्यं सुखानि च ॥
किं नो राज्येन गोविंद किं भोगैर्जीवितेन
वा ॥३२॥ येषामर्थे कांक्षितं नो राज्यं भो
गाः सुखानि च ॥ त इमेवस्थिता युद्धे प्रा

णांस्त्यक्त्वाधनानिच ॥३३॥ आचार्याःपि-
तरःपुत्रास्तथैवचपितामहाः ॥ मातु-
लाःश्वशुराःपौत्राःश्यालाःसंबंधिनस्त
था ॥ एतान्नहंतुमिच्छामिघ्नतोपिमधु
सूदन ॥ अपित्रैलोक्यराज्यस्यहेतोःकिं

गी. ए
१

ममहीकृते॥३५॥निहत्यधार्तराष्ट्रान्नः
काप्रीतिःस्याज्जनार्दन॥पापमेवाश्रये
दस्मान्हत्वैतानाततायिनः॥तस्मान्ना
र्हावयंहंतुंधार्तराष्ट्रान्स्वबांधवान्॥स्व
जनंहिकथंहत्वासुखिनःस्याममाधव

यद्यप्येतेनयश्रृण्वंतिलोभोपहतेवेनमः २५
झलवलयहूतेदोषमित्वड्डोहेचपातके
कष्टेनतेयमस्माभिःपापादस्मानिवा
तिंतमः॥झलवलयहूतेदोषप्रपपत्रि
मेनादेन॥२९॥झलवलयेप्रणाशंपतिऊ

गी.
९८
१

लधर्माःसनातनाः॥धर्मेनष्टेकुलंकृत्स्न
मधर्मोऽभिभवत्युत॥४०॥अधर्माभिभवा
त्कृष्णप्रदुष्यन्तिकुलस्त्रियः॥स्त्रीषुदुष्टा
सुवार्ष्णेयजायतेवर्णसंकरः॥४१॥संक
रोनरकायैवकुलघ्नानांकुलस्यच॥प

तंति पितरो ह्येषां लुप्तपिंडोदकक्रियाः
दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः
उत्साद्यंते जातिधर्माः कुलधर्माश्च शाश्व
श्वताः ॥ ४३ ॥ उत्सन्नकुलधर्माणां मनुष्या
णां जनार्दन ॥ नरके नियतं वासो भवती ४१

गी.
२१

नुशुश्रुम॥ अहोबतमहत्पापंकर्तुंव्य
वसितावयम्॥ यद्राज्यसुखलोभेनहंतुं
स्वजनमुद्यताः॥४५॥ यदिमामप्रतीका
रमशस्त्रंशस्त्रपाणयः॥ धार्तराष्ट्रारणे
हन्युस्तन्मेक्षेमतरंभवेत्॥४६॥ संजयउ

वाच॥ एवमुक्त्वार्जुनःसंख्येरथोपस्थउप
विशत्॥ विसृज्यसशरंचापंशोकसंवि
ग्नमानसः॥ ४७ ॥ इतिश्रीभगवद्गीतासूप
निषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृ
ष्णार्जुनसंवादेअर्जुनविषादोनामप्रथ

गी॰ २ १

मोध्यायः ॥ १ ॥ संजय उवाच ॥ ॐ तं तथा कृ
पयाविष्टमश्रुपूर्णाकुलेक्षणम् ॥ वि·
षीदंतमिदं वाक्यमुवाच मधुसूदनः ॥
श्रीभगवानुवाच ॥ कुतस्त्वा कश्मलमि
दं विषमे समुपस्थितम् ॥ अनार्यजुष्टम

मत्स्य २



2

स्वर्ग्यमकीर्तिकरमर्जुन ॥२॥ क्लैब्यंमा

स्मगमःपार्थनैतत्त्वय्युपपद्यते ॥ क्षुद्रं

हृदयदौर्बल्यंत्यक्त्वोत्तिष्ठपरंतप ॥ अ

र्जुनउवाच ॥ कथंभीष्ममहंसंख्येद्रोणं

चमधुसूदन ॥ इषुभिःप्रतियोत्स्यामि

पूजार्हावरिसूदन ॥४॥ गुरूनहत्वाहिमहा
नुभावान्श्रेयोभोक्तुंभैक्ष्यमपीहलोके ॥
हत्वार्थकामांस्तुगुरूनिहैवभुंजीयभोगा
न्रुधिरप्रदिग्धान् ॥५॥ नचैतद्विद्मःकत
रन्नोगरीयोयद्वाजयेमयदिवानोजयेयुः

यानेव हत्वा न जिजीविषामस्तेवस्थिताः

प्रमुखेधार्त्तराष्ट्राः ॥६॥ कार्पण्यदोषोप-

हतस्वभावः पृच्छामि त्वां धर्मसंमूढचे-

ताः ॥ यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्य-

स्तेहं शाधि मां त्वां प्रपन्नम् ॥७॥ न हि प्रप

गी.
१.
२

पश्यामिममापनुद्याद्यच्छोकमुच्छोषणमि
मिंद्रियाणाम् ॥ अवाप्यभूमावसपत्नमृद्धं
राज्यंसुराणामपिचाधिपत्यम् ॥ ८ ॥ संजयउ
वाच ॥ एवमुक्त्वाहृषीकेशंगुडाकेशःपरं
तप ॥ नयोत्स्यइतिगोविंदमुक्त्वातूष्णींबभू

वह ॥९॥ तमुवाचहृषीकेशःप्रहसन्निवभा
रत ॥ सेनयोरुभयोर्मध्येविषीदंतमिदंवचः १
श्रीभगवानुवाच ॥ अशोच्यानन्वशोचस्त्वंप्र
ज्ञावादांश्चभाषसे ॥ गतासूनगतासूंश्च
नानुशोचंतिपंडिताः ॥११॥ नत्वेवाहंजातु

गी. २। २

नासंनत्वंनेमेजनाधिपाः ॥ नचैवनभवि-
ष्यामःसर्वेवयमतःपरम् ॥१२॥ देहिनोस्मि
न्यथादेहेकौमारंयौवनंजरा ॥ तथादेहांत
रप्राप्तिर्धीरस्तत्रनमुह्यति ॥१३॥ मात्रास्प-
र्शास्तुकौंतेयशीतोष्णसुखदुःखदाः ॥

आगमापायिनोनित्यास्तांस्तितिक्षस्वभा
रत ॥१४॥ यंहिनव्यथयंत्येतेपुरुषंपुरुष·
र्षभ ॥ समदुःखसुखंधीरंसोमृतत्वायक
ल्पते ॥१५॥ नासतोविद्यतेभावोनाभावो·
विद्यतेसतः ॥ उभयोरपिदृष्टोंतस्त्वनयो·

गी.
११
२

त्त्वदर्शिभिः ॥१६॥ अविनाशि तु तद्वि
द्धि येन सर्वमिदं ततम् ॥ विनाशमव्यय
स्यास्य न कश्चित्कर्तुमर्हति ॥ अंतवंत इमे
देहा नित्यस्योक्ताः शरीरिणः ॥ अनाशि
नोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥१८॥ य

यनंवेत्तिहंतारंयश्चैनंमन्यतेहतम्॥उभौ
तौनविजानीतोनायंहंतिनहन्यते॥१९॥
नजायतेम्रियतेवाकदाचिन्नायंभूत्वाभ
वितावानभूयः॥अजोनित्यःशाश्वतोयं
पुराणोनहन्यतेहन्यमानेशरीरे॥२०॥वे

दाविनाशिनंनित्यंयएनमजमव्ययम्॥
कथंसपुरुषःपार्थकंघातयतिहंतिकं।
वासांसिजीर्णानियथाविहायनवानिगृ
ह्णातिनरोपराणि॥तथाशरीराणिवि-
हायजीर्णान्यन्यानिसंयातिनवानिदेही

नैनंछिंदंतिशस्त्राणिनैनंदहतिपावक ः
नचैनंक्लेदयंत्यापोनशोषयतिमारुत ॥ २३
अच्छेद्योयमदाह्योयमक्लेद्योशोष्यएवच
नित्यःसर्वगतःस्थाणुरचलोयंसनातनः २४
अव्यक्तोयमचिंत्योयमविकार्योयमुच्य

ते ॥ तस्मादेवं विदित्वैनं नानुशोचितुमर्ह-
सि ॥ अथ चैनं नित्यजातं नित्यं वा मन्यसे मृ-
तम् ॥ तथापि त्वं महाबाहो नैवं शोचितु-
मर्हसि ॥ २६ ॥ जातस्य हि ध्रुवो मृत्युर्ध्रुवं ज-
न्म मृतस्य च ॥ तस्मादपरिहार्येर्थे न त्वं शो-

वितुमर्हसि ॥२७॥ अव्यक्तादीनिभूतानिव्य
क्तमध्यानिभारत ॥ अव्यक्तनिधनान्येवत
त्रकापरिदेवना ॥२८॥ आश्चर्यवत्पश्यति
कश्चिदेनमाश्चर्यवद्वदतितथैवचान्यः ॥
आश्चर्यवच्चैनमन्यःशृणोतिश्रुत्वाप्येनं

गी.
२९
२

वेदनचैवकश्चित॥२९॥देहीनित्यमवध्यो
यंदेहेसर्वस्यभारत॥तस्मात्सर्वाणिभूता
निनत्वंशोचितुमर्हसि॥स्वधर्ममपिचा
वेक्ष्यनविकंपितुमर्हसि॥धर्म्याद्धियु
द्धाछ्रेयोन्यत्क्षत्रियस्यनविद्यते॥३१॥य

दृच्छयाचोपपन्नंस्वर्गद्वारमपावृतम्
सुखिनःक्षत्रियाःपार्थलभंतेयुद्धमीदृ
शम्॥३२॥अथचेत्त्वमिमंधर्म्यंसंग्रामंन
करिष्यसि॥ततःस्वधर्मंकीर्तिंचहित्वा
पापमवाप्स्यसि॥अकीर्तिंचापिभूतानि

कथयिष्यंतितेव्ययाम् ॥ संभावितस्यचा
कीर्तिर्मरणादतिरिच्यते ॥३४॥ भयाद्र
णादुपरतंमंस्यंतेत्वांमहारथाः ॥ येषांच
त्वंबहुमतोभूत्वायास्यसिलाघवम् ॥ अ
वाच्यवादांश्चबहून्वदिष्यंतितवाहिता

निंदंतस्तवसामर्थ्यंततोदुःखतरंनुकिं ३८
हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसे
महीम्॥ तस्मादुत्तिष्ठकौंतेययुद्धाय
कृतनिश्चयः॥ ३७॥ सुखदुःखेसमेकृ
त्वालाभालाभौजयाजयौ॥ ततोयुद्धा

गी.
२
२

ययुज्यस्वनैवंपापमवाप्स्यसि॥ एषातेभि
हितासांख्येबुद्धिर्योगेत्विमांशृणु॥ बुद्ध्या
युक्तोययापार्थकर्मबंधंप्रहास्यसि॥ ३९
नेहाभिक्रमनाशोस्तिप्रत्यवायोनविद्य-
ते। स्वल्पमप्यस्यधर्मस्यत्रायतेमहतोभ-

यात् ॥४०॥ व्यवसायात्मिकाबुद्धिरेकेहकु
रुनंदन ॥ बहुशाखाह्यनंताश्चबुद्धयो
व्यवसायिनाम् ॥ यामिमांपुष्पितांवाचं
प्रवदंत्यविपश्चितः ॥ वेदवादरताःपार्थ
नान्यदस्तीतिवादिनः ॥४२॥ कामात्मा

नःस्वर्गपराजन्मकर्मफलप्रदाम्॥क्रिया
विशेषबहुलांभोगैश्वर्यगतिंप्रति॥भोगै
श्वर्यप्रसक्तानांतयापहृतचेतसाम्॥व्यव
सायात्मिकाबुद्धिःसमाधौनविधीयते॥
त्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुन

निर्द्वंद्वो नित्यसत्वस्थो निर्योगक्षेम आत्मवा
न् ॥ यावानर्थ उदपाने सर्वतः संप्लुतोदके ॥
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ५८
कर्मण्येवाधिकारस्ते मा फलेषु कदाच ॥
न ॥ मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वका

र्मणि॥ योगस्थः कुरु कर्माणि संगं त्यक्त्वा ध
नंजय॥ सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं यो
ग उच्यते॥ ४८॥ दूरेण ह्यवरं कर्म बुद्धियोगा
द्धनंजय॥ बुद्धौ शरणमन्विच्छ कृपणाः
फलहेतवः॥ बुद्धियुक्तो जहातीह उभे सु

कृतदुःकृते ॥ तस्माद्योगाययुज्यस्वयोगः

कर्मसुकौशलम् ॥५०॥ कर्मजंबुद्धियुक्ता

हिफलंत्यक्त्वामनीषिणः ॥ जन्मबंधवि·

निर्मुक्ताःपदंगच्छंत्यनामयम् ॥५१॥ य·

दातेमोहकलिलंबुद्धिर्व्यतितरिष्यति ॥

गी.
३.
२

तदागंतासिनिर्वेदंश्रोतव्यस्यश्रुतस्यच
श्रुतिविप्रतिपन्नातेयदास्थास्यतिनिश्च
ला॥समाधावचलाबुद्धिस्तदायोगमवा
प्स्यसि॥५३॥अर्जुनउवाच॥स्थितप्रज्ञस्य-
काभाषासमाधिस्थस्यकेशव॥स्थित

धीः किं प्रभाषेत किमासीत व्रजेत किं
श्रीभगवानुवाच ॥ प्रजहाति यदा कामा
न्सर्वान्पार्थ मनोगतान् ॥ आत्मन्येवा
त्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ दुःखे
ष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः

वीतरागभयक्रोधःस्थितधीर्मुनिरुच्यते
यःसर्वत्रानभिस्नेहस्तत्तत्प्राप्यशुभाशु
भम्॥नाभिनंदतिनद्वेष्टितस्यप्रज्ञाप्रति
ष्ठिता॥५७॥यदासंहरतेचायंकूर्मोंगानी
वसर्वशः॥इंद्रियाणींद्रियार्थेभ्यस्तस्यप्र

ज्ञाप्रतिष्ठिता ॥ ५८ ॥ विषयाविनिवर्तंते
निराहारस्यदेहिनः ॥ रसवर्जंरसोप्यस्य
परंदृष्ट्वानिवर्तते ॥ यततोपिहिकौंतेय
पुरुषस्यविपश्चितः ॥ इंद्रियाणिप्रमाथी
निहरंतिप्रसभंमनः ॥ ६० ॥ तानिसर्वाणि

गी.
३१
२

संयम्ययुक्तआसीतमत्परः ॥ वशेहियस्ये
न्द्रियाणितस्यप्रज्ञाप्रतिष्ठिता ॥ ध्यायतो
विषयान्पुंसःसंगस्तेषूपजायते ॥ संगात्सं
जायतेकामःकामात्क्रोधोभिजायते ॥ ६२
क्रोधाद्भवतिसंमोहःसंमोहात्स्मृतिवि

भ्रमः॥ स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशा

त्प्रणश्यति॥ रागद्वेषवियुक्तैस्तु विषया

निंद्रियैश्चरन्॥ आत्मवश्यैर्विधेयात्मा प्र

सादमधिगच्छति॥ ६४॥ प्रसादे सर्वदुः

खानां हानिरस्योपजायते॥ प्रसन्नचेतसो

ह्याशुबुद्धिःपर्यवतिष्ठते॥ नास्तिबुद्धिरयु
क्तस्यनचायुक्तस्यभावना॥ नचाभावय
तःशांतिरशांतस्यकुतःसुखम्॥६६॥इं
द्रियाणांहिचरतांयन्मनोऽनुविधीयते॥
तदस्यहरतिप्रज्ञांवायुर्नावमिवांभसि

तस्माद्यस्यमहाबाहोनिगृहीतानिसर्वशः
इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठि-
ता॥६८॥यानिशासर्वभूतानांतस्यांजाग
र्तिसंयमी॥यस्यांजाग्रतिभूतानिसानि-
शापश्यतोमुनेः॥६९॥आपूर्यमाणमच-

गी॰
३४
२

लप्रतिष्ठंसमुद्रमापःप्रविशंतियद्वत्॥त
द्वत्कामायंप्रविशंतिसर्वेसशांतिमाप्नो
तिनकामकामी॥७०॥विहायकामान्यः
सर्वान्पुमांश्चरतिनिस्पृहः॥निर्ममोनि
रहंकारःसशांतिमधिगच्छति॥७१॥ए

षा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमु
ह्यति ॥ स्थित्वास्यामंतकालेपि ब्रह्मनि
र्वाणमृछति ॥७२॥ इति श्रीभगवद्गीता
सूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे सांख्ययोगो नाम

द्वितीयोध्यायः ॥ २ ॥ अर्जुन उवाच ॥ ॐ ज्याय
सीचेत्कर्मणास्ते मता बुद्धिर्जनार्दन ॥ तत्किं
कर्मणि घोरे मां नियोजयसि केशव ॥ १ ॥
व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव
मे ॥ तदेकं वद निश्चित्य येन श्रेयोहमाप्नु


कूर्म २

याम् ॥ २ ॥ श्रीभगवानुवाच ॥ लोकेस्मिन्द्वि
विधानिष्ठापुराप्रोक्तामयानघ ॥ ज्ञानयो
गेनसांख्यानांकर्मयोगेनयोगिनाम् ॥ ३
नकर्मणामनारंभान्नैष्कर्म्यंपुरुषोश्नुते ॥
नचसंन्यसनादेवसिद्धिंसमधिगच्छति ४

गी. नहिकश्चित्क्षणमपिजातुतिष्ठत्यकर्म
३९ कृत्॥कार्यतेह्यवशःकर्मसर्वःप्रकृति
३ जैर्गुणैः॥५॥कर्मेंद्रियाणिसंयम्ययआ
स्तेमनसास्मरन्॥इंद्रियार्थान्विमूढा
त्मामिथ्याचारःसउच्यते॥६॥यस्त्विंद्रि

याणिमनसानियम्यारभतेर्जुन ॥ कर्मे
द्रियैःकर्मयोगमसक्तःसविशिष्यते ॥७
नियतंकुरुकर्मत्वंकर्मज्यायोह्यकर्मणः
शरीरयात्रापिचतेनप्रसिद्धेदकर्मणः ॥ ८
यज्ञार्थात्कर्मणोन्यत्रलोकोयंकर्मबंध

नः ॥ तदर्थं कर्म कौंतेय मुक्तसंगः समाच
र ॥ सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजाप
तिः ॥ अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टका·
मधुक् ॥१०॥ देवान्भावयतानेन ते देवा भ
वयंतु वः ॥ परस्परं भावयंतः श्रेयः परमा

मवाप्स्यथ॥११॥इष्टान्भोगान्हि वो देवा
दास्यंते यज्ञभाविताः॥तैर्दत्तानप्रदायै
भ्यो यो भुंक्ते स्तेन एव सः॥यज्ञशिष्टाशि
नः संतो मुच्यंते सर्वकिल्बिषैः॥भुं
जते ते त्वघं पापा ये पचंत्यात्मकारणात् ६

गी.
३५
३

अन्नाद्भवंतिभूतानिपर्जन्यादन्नसंभवः ॥ य
ज्ञाद्भवतिपर्जन्योयज्ञःकर्मसमुद्भवः ॥ १४
कर्मब्रह्मोद्भवंविद्धिब्रह्माक्षरसमुद्भवं
तस्मात्सर्वगतंब्रह्मनित्यंयज्ञेप्रतिष्ठितं
एवंप्रवर्तितंचक्रंनानुवर्तयतीहयः ॥

घायुरिंद्रियारामोमोघंपार्थसजीवति १६
यस्त्वात्मरतिरेवस्यादात्मतृप्तश्चमानवः
आत्मन्येवचसंतुष्टस्तस्यकार्यंनविद्यते १७
नैवतस्यकृतेनार्थोनाकृतेनेहकश्चन
नचास्यसर्वभूतेषुकश्चिदर्थव्यपाश्रयः १८

गी.
३९
३

तस्मादसक्तःसततंकार्यंकर्मसमाचर ॥
असक्तोह्याचरन्कर्मपरमाप्नोतिपूरुषः ॥
कर्मणैवहिसंसिद्धिमास्थिताजनकाद
यः ॥ लोकसंग्रहमेवापिसंपश्यन्कर्तुम
र्हसि ॥२०॥ यद्यदाचरतिश्रेष्ठस्तत्तदेवेत

रोजनः॥ स यत्रमाणोऽकतेलोकस्त्रबद्व
वतेंते॥ ११॥ नमेपाथ्योक्तिकतेंथ्येविष्युलो
केषुकिंचन॥ नानवामसवामथ्येवतेंपव
वकमेति॥ १२॥ यदिहलहेनवतेंथेजातेव
कमेणपनेंडिनः॥ ममवन्मोत्रुवतेंतेमउ

गी. अ. ३

ष्याः पार्थ सर्वशः ॥ २३ ॥ उत्सीदेयुरिमे लो
का न कुर्यां कर्म चेदहम् ॥ संकरस्य च क
र्ता स्यामुपहन्यामिमाः प्रजाः ॥ सक्ताः क
र्मण्यविद्वांसो यथा कुर्वंति भारत ॥ कुर्या
द्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहं ।

नबुद्धिभेदंजनयेदज्ञानांकर्मसंगिनाम्॥
जोषयेत्सर्वकर्माणिविद्वान्युक्तःसमाच
रन्॥२६॥प्रकृतेःक्रियमाणानिगुणैःक
र्माणिसर्वशः॥अहंकारविमूढात्माक
र्ताहमितिमन्यते॥तत्ववित्तुमहाबाहो

गी. अ. ३

गुणकर्मविभागयोः॥ गुणागुणेषुवर्त
तेइतिमत्वानसज्जते॥२८॥प्रकृतेर्गुणसं
मूढाःसज्जंतेगुणकर्मसु॥तानकृत्स्न
विदोमंदान्कृत्स्नविन्नविचालयेत्॥२
मयिसर्वाणिकर्माणिसंन्यस्याध्यात्म-

चेतसा ॥ निराशीर्निर्ममो भूत्वा युध्यस्व
विगतज्वरः ॥३०॥ ये मे मतमिदं नित्यम
नुतिष्ठंति मानवाः ॥ श्रद्धावंतोनसूयं
तो मुच्यंते तेपि कर्मभिः ॥३१॥ ये त्वेत
दभ्यसूयंतो नानुतिष्ठंति मे मतम् । स

गी॰
अ॰
३

ज्ञानविमूढांस्तान्विद्धिनष्टानचेतसः
सदृशंचेष्टतेस्वस्याःप्रकृतेर्ज्ञानवानपि
प्रकृतिंयांतिभूतानिनिग्रहःकिंकरि
ष्यति॥३३॥इंद्रियस्येंद्रियस्यार्थेरागद्वे
षौव्यवस्थितौ॥तयोर्नवशमागच्छेत्तौ

ह्यस्यपरिपंथिनौ ॥३४॥ श्रेयान्स्वधर्मोवि
गुणःपरधर्मात्स्वनुष्ठितात् ॥ स्वधर्मेनि
धनंश्रेयःपरधर्मोभयावहः ॥३५॥ अर्जु
नउवाच ॥ अथकेनप्रयुक्तोयंपापंचरति
पूरुषः ॥ अनिच्छन्नपिवार्ष्णेयबलादिव-

गी.
४३
३

नियोजितः ॥ ३६ ॥ श्रीभगवानुवाच ॥ काम
एषक्रोधएषरजोगुणसमुद्भवः ॥ महाश
नोमहापाप्माविद्ध्येनमिहवैरिणम् ॥ ३७
धूमेनाव्रियतेवह्निर्यथादर्शोमलेनच ॥
यथोल्बेनावृतोगर्भस्तथातेनेदमावृतम् ॥

आवृतंज्ञानमेतेनज्ञानिनोनित्यवैरिणा ॥
कामरूपेणकौंतेयदुःपूरेणानलेनच ॥ ३९
इंद्रियाणिमनोबुद्धिरस्याधिष्ठानमुच्यते
एतैर्विमोहयत्येषज्ञानमावृत्यदेहिनम ॥
तस्मात्त्वमिंद्रियाण्यादौनियम्यभरतर्षभ

५·

गी.
४४
३


पाप्मानंप्रजहिह्येनंज्ञानविज्ञाननाशनं ४
इंद्रियाणिपराण्याहुरिंद्रियेभ्यःपरंमनः
मनसस्तुपराबुद्धिर्योबुद्धेःपरतस्तुसः ॥
एवंबुद्धेःपरंबुद्ध्वासंस्तभ्यात्मानमात्मना
जहिशत्रुंमहाबाहोकामरूपंदुरासदं ४

इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्या-
यां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्म
योगो नाम तृतीयोध्यायः ॥३॥ श्रीभगवा
नुवाच ॥ ॐ इमं विवस्वते योगं प्रोक्तवानह
मव्ययम् ॥ विवस्वान्मनवे प्राह मनुरिक्ष्वा

कवेब्रवीत् ॥ ॥ एवंपरंपराप्राप्तमिमंरा
जर्षयोविदुः ॥ सकालेनेहमहतायो
गोनष्टःपरंतप ॥ सएवायंमयातेद्ययो
गःप्रोक्तःपुरातनः ॥ भक्तोसिमेसखा
चेतिरहस्यंह्येतदुत्तमम् ॥ ३ ॥ अर्जुनउ



४



8

वाच ॥ अपरंभवतोजन्मपरंजन्मविव
स्वतः ॥ कथमेतद्विजानीयांत्वमादौप्रो
क्तवानिति ॥ ४ ॥ श्रीभगवानुवाच ॥ बहू
निमेव्यतीतानिजन्मानितवचार्जुन ॥
तान्यहंवेदसर्वाणिनत्वंवेत्थपरंतप ५

गी.

५८

४

अजोपिसन्नव्ययात्माभूतानामीश्वरोपिस

न्॥ प्रकृतिंस्वामधिष्ठायसंभवाम्यात्ममा

यया॥६॥ यदायदाहिधर्मस्यग्लानिर्भव

तिभारत॥ अभ्युत्थानमधर्मस्यतदात्मा

नंसृजाम्यहम्॥७॥ परित्राणायसाधूनां

विनाशायचदुष्कृनाम् ॥ यमेमेस्थापना
र्थायसेभवामियुगेयुगे ॥ ८ ॥ जन्मकमे
चमेदिव्यमेवंयोवेतितत्वतः ॥ त्यक्त्वादे
हेपुनर्जन्मनैतिमामेतिसोर्जुन ॥ ९ ॥ वी
तरागभयक्रोधामन्मयामामुपाश्रिताः

बहवो ज्ञानतपसा पूता मद्भावमागताः
ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहं
मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः
कांक्षंतः कर्मणां सिद्धिं यजंत इह देव
ताः ॥ क्षिप्रं हि मानुषे लोके सिद्धिर्भव

तिकर्मजा ॥१२॥ चातुर्वर्ण्यंमयासृष्टंगुण
कर्मविभागशः ॥ तस्यकर्त्तारमपिमांवि
द्ध्यकर्त्तारमव्ययम् ॥ नमांकर्माणिलिंपं
तिनमेकर्मफलेस्पृहा ॥ इतिमांयोभिजा
नातिकर्मभिर्नसबध्यते ॥१४॥ एवंज्ञात्वा

गी. ४८

८

कृतंकर्मपूर्वैरपिमुमुक्षुभिः॥ कुरुक
र्मैवतस्मात्त्वंपूर्वैःपूर्वतरंकृतम्॥१५॥कि
कर्मकिमकर्मेतिकवयोऽप्यत्रमोहिताः
तत्तेकर्मप्रवक्ष्यामियज्ज्ञात्वामोक्ष्यसेऽशु
भात्॥१६॥कर्मणोह्यपिबोद्धव्यंबोद्धव्यं

चविकर्मणः ॥ अकर्मणश्चबोद्धव्यंगह
नाकर्मणोगतिः ॥ १७ ॥ कर्मण्यकर्मयःप
श्येदकर्मणिचकर्मयः ॥ सबुद्धिमान्म
नुष्येषुसयुक्तःकृत्स्नकर्मकृत ॥ १८ ॥ य
स्यसर्वेसमारंभाःकामसंकल्पवर्जिता:

गी.
४९

ज्ञानाग्निदग्धकर्माणंतमाहुःपंडितंबुधाः
त्यक्त्वाकर्मफलासंगंनित्यतृप्तोनिराश्रयः
कर्मण्यभिप्रवृत्तोपिनैवकिंचित्करोति
सः॥२०॥निराशीर्यतचित्तात्मात्यक्तसर्वप
रिग्रहः॥शारीरंकेवलंकर्मकुर्वन्नाप्नोति

किल्बिषम् ॥ २१ ॥ यदृच्छालाभसंतुष्टो द्वंद्वा-
तीतो विमत्सरः ॥ समः सिद्धावसिद्धौ च कृ-
त्वापि न निबध्यते ॥ गतसंगस्य मुक्तस्य ज्ञा-
नावस्थितचेतसः ॥ यज्ञायाचरतः कर्म स-
मग्रं प्रविलीयते ॥ २३ ॥ ब्रह्मार्पणं ब्रह्म ह-

गी.
प.
४

विर्ब्रह्माग्नौब्रह्मणाहुतम्॥ब्रह्मैवतेनगं-
तव्यंब्रह्मकर्मसमाधिना॥२४॥दैवमेवाप
रेयज्ञंयोगिनःपर्युपासते॥ब्रह्माग्नावपरे
यज्ञंयज्ञेनैवोपजुह्वति॥२५॥श्रोत्रादीनी-
न्द्रियाण्यन्येसंयमाग्निषुजुह्वति॥शब्दादी

न्विषयानन्यइंद्रियाग्निषुजुह्वति ॥२६॥ सर्वा
णीन्द्रियकर्माणिप्राणकर्माणिचापरे ॥
आत्मसंयमयोगाग्नौजुह्वतिज्ञानदीपिते ॥ २७
द्रव्ययज्ञास्तपोयज्ञायोगयज्ञास्तथापरे ॥ स्वा
ध्याययज्ञानयज्ञाश्चयतयःसंशितव्रताः ॥ २८

अपानेजुह्वतिप्राणंप्राणेपानंतथापरे॥
प्राणापानगतीरुद्ध्वाप्राणायामपराय
णाः॥२९॥अपरेनियताहाराःप्राणान्प्रा
णेषुजुह्वति॥सर्वेप्येतेयज्ञविदोयज्ञक्ष
पितकल्मषाः॥३०॥यज्ञशिष्टामृतभुः

जो यांति ब्रह्म सनातनम् ॥ नायं लोकोस्त्य

यज्ञस्य कुतोन्यः कुरुसत्तम ॥३१॥ एवं ब-

हुविधा यज्ञा वितता ब्रह्मणो मुखे ॥ क

र्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्य-

से ॥३२॥ श्रेयान्द्रव्यमयाद्यज्ञाज्ञानयज्ञः

पंतप ॥ सर्वंकर्माखिलंपार्थज्ञानेपरिस
माप्यते ॥ ३३ ॥ तद्विद्धिप्रणिपातेनपरिप्र-
श्नेनसेवया ॥ उपदेक्ष्यंतितेज्ञानंज्ञानिन-
स्तत्वदर्शिनः ॥ ३४ ॥ यज्ज्ञात्वानपुनर्मोह-
मेवंयास्यसिपांडव ॥ येनभूतान्यशेषेण-

द्रक्ष्यस्यात्मन्यथोमयि ॥३५॥ अपिचेदसि
पापेभ्यःसर्वेभ्यःपापकृत्तमः ॥ सर्वंज्ञा-
नप्लवेनैववृजिनंसंतरिष्यसि ॥ यथैधां-
सिसमिद्धोग्निर्भस्मसात्कुरुतेर्जुन ॥ ज्ञा-
नाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथा ३७

नहिज्ञानेनसदृशंपवित्रमिहविद्यते
तत्स्वयंयोगसंसिद्धःकालेनात्मनिविंद
ति॥३८॥श्रद्धावांल्लभतेज्ञानंतत्परःसंयतें
द्रियः॥ज्ञानेलब्ध्वापरांशांतिमचिरेणा॰
धिगच्छति॥३९॥अज्ञश्चाश्रद्दधानश्चसं॰

शयात्माविनश्यति ॥ नायंलोकोस्तिनप
रोनसुखंसंशयात्मनः ॥४०॥ योगसंन्यस्त
कर्माणंज्ञानसंछिन्नसंशयम् ॥ आत्मवं
तंनकर्माणिनिबध्नंतिधनंजय ॥ तस्मा
दज्ञानसंभूतंहृत्स्थंज्ञानासिनात्मनः ॥

गी.
५४
८

छित्वैनंसंशयंयोगमातिष्ठोत्तिष्ठभारत
इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्या-
यांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेकर्म
संन्यासयोगोनामचतुर्थोध्यायः ॥ ४ ॥ अ
र्जुनउवाच ॥ ॐसंन्यासंकर्मणांकृष्णपुन

योगंचशंससि ॥ यच्छ्रेयएतयोरेकंतन्मे
ब्रूहिसुनिश्चितम् ॥ १ ॥ श्रीभगवानुवाच ॥
संन्यासःकर्मयोगश्चनिःश्रेयसकरावु
भौ ॥ तयोस्तुकर्मसंन्यासात्कर्मयोगोवि-
शिष्यते ॥ २ ॥ ज्ञेयःसनित्यसंन्यासीयोन-

द्वेष्टिनकांक्षति॥निर्द्वंद्वोहिमहाबाहो
सुखंबंधात्प्रमुच्यते॥३॥सांख्ययोगौपृ
थग्बालाःप्रवदंतिनपंडिताः॥एकम
प्यास्थितःसम्यगुभयोर्विंदतेफलम्॥
यत्सांख्यैःप्राप्यतेस्थानंतद्योगैरपिगा

म्यते॥ एकंसांख्यंचयोगंचयःपश्यतिस
पश्यति॥५॥ संन्यासस्तुमहाबाहोदुःख
माप्तुमयोगतः॥ योगयुक्तोमुनिर्ब्रह्म
नचिरेणाधिगच्छति॥६॥ योगयुक्तोवि-
शुद्धात्माविजितात्माजितेंद्रियः॥ स-

गी. ५८

र्वभूतात्मभूतात्माकुर्वन्नपिनलिप्यते॥७॥नै
वकिंचित्करोमीतियुक्तोमन्येततत्ववित्॥
पश्यंशृण्वन्स्पृशंजिघ्रन्नश्नन्गच्छन्स्वपं
श्वसन्॥८॥प्रलपन्विसृजन्गृह्णन्नुन्मिष
न्निमिषन्नपि॥इंद्रियाणींद्रियार्थेषुवर्तंते·

इति धारयन् ॥ ९ ॥ ब्रह्मण्याधाय कर्माणि सं
गं त्यक्त्वा करोति यः ॥ लिप्यते न स पापेन प
द्मपत्रमिवांभसा ॥ कायेन मनसा बुद्ध्या॰
केवलैरिंद्रियैरपि ॥ योगिनः कर्म कुर्वंति॰
संगं त्यक्त्वात्मशुद्धये ॥ ११ ॥ युक्तः कर्मफलं

त्यक्त्वा शांतिमाप्नोति नैष्ठिकीम् ॥ अयुक्तः
कामकारेण फले सक्तो निबध्यते ॥ १२ ॥ स
र्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ॥
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥ १३ ॥
न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः

नकर्मफलसंयोगंस्वभावस्तुप्रवर्त्तते॥१४
नादत्तेकस्यचित्पापंनचैवसुकृतंविभुः॥
अज्ञानेनावृतंज्ञानंतेनमुह्यंतिजंतवः॥१५
ज्ञानेनतुतदज्ञानंयेषांनाशितमात्मनः
तेषामादित्यवज्ज्ञानंप्रकाशयतितत्परं

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः
गछंत्यपुनरावृत्तिंज्ञाननिर्धूतकल्मषाः ॥
विद्याविनयसंपन्नेब्राह्मणेगविहस्तिनि
शुनिचैवश्वपाकेचपंडिताःसमदर्शिनः
इहैवतैर्जितःसर्गोयेषांसाम्येस्थितंमनः

निर्दोषंहिसमंब्रह्मतस्माद्ब्रह्मणितेस्थिता ॥१९
नप्रहृष्येत्प्रियंप्राप्यनोद्विजेत्प्राप्यचाप्रियं
स्थिरबुद्धिरसंमूढोब्रह्मविद्ब्रह्मणिस्थि
तः ॥ बाह्यस्पर्शेष्वसक्तात्माविंदत्यात्मनि
यत्सुखम् ॥ सब्रह्मयोगयुक्तात्मासुखम

गी.
५५
५

मक्षयमश्नुते ॥ २१ ॥ येहिसंस्पर्शजाभोगा·
दुःखयोनयएवते ॥ आद्यंतवंतःकौंतेयन
तेषुरमतेबुधः ॥ शक्नोतीहैवयःसोढुंप्रा
क्शरीरविमोक्षणात् ॥ कामक्रोधोद्भवं
वेगंसयुक्तःससुखीनरः ॥ २३ ॥ योंतःसु·

खोंतरारामस्तथांतर्ज्योतिरेव यः ॥ सयो
गीब्रह्मनिर्वाणंब्रह्मभूतोधिगच्छति ॥ २ ५
लभंतेब्रह्मनिर्वाणमृषयःक्षीणका
ल्मषाः ॥ छिन्नद्वैधायतात्मानःसर्वभू
तहितेरताः ॥ २५ ॥ कामक्रोधवियुक्ताना

नांयतीनांयतचेतसाम् ॥ अभितोब्रह्म-
निर्वाणंवर्ततेविदितात्मनाम् ॥ २६ ॥ स्प-
र्शान्कृत्वाबहिर्बाह्यांश्चक्षुश्चैवांतरेभ्रु-
वोः ॥ प्राणापानौसमौकृत्वानासाभ्यंतर
चारिणौ ॥ २७ ॥ यतेंद्रियमनोबुद्धिर्मुनि-

मोक्षपरायणः ॥ विगतेच्छाभयक्रोधोयः
सदामुक्तएवसः ॥ २८ ॥ भोक्तारंयज्ञतपसां
सर्वलोकमहेश्वरं ॥ सुहृदंसर्वभूतानांज्ञा
त्वामांशांतिमृछति ॥ २९ ॥ इतिश्रीभगवद्गी
तासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्री॰

गी·
द।
५

कृस्नार्जुनसंवादेसंन्यासयोगोनामपंचमो·


ध्यायः॥५॥श्रीभगवानुवाच॥ॐअनाश्रितः

कर्मफलंकार्यंकर्मकरोतियः॥ससंन्या

सीचयोगीचननिरग्निर्नचाक्रियः॥१॥यंसं

न्यासमितिप्राहुर्योगंतंविद्धिपांडव॥नह्य·

525 99


नृसिंहः ५

श्री

ह

संन्यस्तसंकल्पो योगी भवति कश्चन ॥२॥ आ
रुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ॥ योगा
रूढस्य तस्यैव शमः कारणमुच्यते ॥३॥ यदा
हि नेंद्रियार्थेषु न कर्मस्वनुषज्जते ॥ सर्व
संकल्पसंन्यासी योगारूढस्तदोच्यते ॥४

गी.
८१
६

उद्धरेदात्मनात्मानन्नात्मानमवसादयेत्॥
आत्मैवह्यात्मनोबंधुरात्मैवरिपुरात्मनः॥
बंधुरात्मात्मनस्तस्ययेनात्मैवात्मनाजितः
अनात्मनस्तुशत्रुत्वेवर्त्तेतात्मैवशत्रुवत्॥
जितात्मनःप्रशांतस्यपरमात्मासमाहितः

शीतोस्नसुखदुःखेषुतथामानापमानयो ः ७

ज्ञानविज्ञानतृप्तात्माकूटस्थोविजितेंद्रि

यः ॥ युक्तइत्युच्यतेयोगीसमलोष्टाश्मकां

चनः ॥ ८ ॥ सुहृन्मित्रार्युदासीनमध्यस्थद्वे

ष्यबंधुषु ॥ साधुष्वपिचपापेषुसमबुद्धि

गी. ८३ ६

विशिष्यते ॥९॥ योगी युंजीत सततमात्मा
नं रहसि स्थितः ॥ एकाकी यतचित्तात्मा
निराशीरपरिग्रहः ॥ शुचौ देशे प्रतिष्ठाप्य
स्थिरमासनमात्मनः ॥ नात्युच्छ्रितं नाति
नीचं चैलाजिनकुशोत्तरम् ॥११॥ तत्रैका·

ग्रंमनःकृत्वायतचित्तेंद्रियक्रियः॥उपवि
श्यासनेयुंज्याद्योगमात्मविशुद्धये॥१२॥
समंकायशिरोग्रीवंधारयन्नचलंस्थिरः
संप्रेक्ष्यनासिकाग्रंस्वंदिशश्चानवलो
कयन्॥१३॥प्रशांतात्माविगतभीर्ब्रह्म

गी.
५४
३

चारिव्रतेस्थितः ॥ मनःसंयम्यमच्चित्तोयु
क्तआसीतमत्परः ॥ ४ ॥ युंजन्नेवंसदात्मा-
नंयोगीनियतमानसः ॥ शांतिंनिर्वाण-
परमांमत्संस्थामधिगच्छति ॥ ५ ॥ नात्य
श्नतस्तुयोगोस्तिनचैकांतमनश्नतः ॥ न

चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥१६
युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ॥
युक्तस्वप्नावबोधस्य योगो भवति दुःख
हा ॥१७॥ यदा विनियतं चित्तमात्मन्येवा
वतिष्ठते ॥ निःस्पृहः सर्वकामेभ्यो युक्त

इत्युच्यते तदा ॥१८॥ यथा दीपो निवातस्थो
नेंगते सोपमा स्मृता ॥ योगिनो यतचित्तस्य
युंजतो योगमात्मना ॥ यत्रोपरमते चित्तं नि
रुद्धं योगसेवया ॥ यत्र चैवात्मनात्मानं पश्य
न्नात्मनि तुष्यति ॥२०॥ सुखमात्यंतिकं यत्त

द्धिग्राह्यमतींद्रियम्॥ वेत्तियत्रनचैवायं·
स्थितश्चलतितत्वतः॥२१॥ यंलब्धाचापरं
लाभंमन्यतेनाधिकंततः॥ यस्मिन्स्थितो·
नदुःखेनगुरुणापिविचाल्यते॥२२॥ तंवि
द्यादुःखसंयोगवियोगंयोगसंज्ञितम्॥

गी.
५८
६

सनिश्चयेनयोक्तव्योयोगोनिर्विंण्णचेतसा
संकल्पप्रभवान्कामांस्त्यक्त्वासर्वानशेष
ताः॥ मनसैवेंद्रियग्रामंविनियम्यसमंत
तः॥२४॥ शनैःशनैरुपरमेद्बुध्याधृतिगृ
हीतया॥ आत्मसंस्थंमनःकृत्वानकिंचि

दपिचिंतयेत् ॥ २५ ॥ यतोयतोनिश्चरतिम
नश्चंचलमस्थिरम् ॥ ततस्ततोनियम्यैतदा
त्मन्येववशंनयेत् ॥ प्रशांतमनसंह्येनंयो
गिनंसुखमुत्तमम् ॥ उपैतिशांतरजसंब्र
ह्मभूतमकल्मषम् ॥ २७ ॥ युंजन्नेवंसदात्मा

गी. ८२ ६

नं योगी विगतकल्मषः ॥ सुखेन ब्रह्मसंस्प
र्शमत्यंतं सुखमश्नुते ॥ २८ ॥ सर्वभूतस्थमा
त्मानं सर्वभूतानि चात्मनि ॥ ईक्षते योगयु
क्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥ यो मां पश्य
ति सर्वत्र सर्वं च मयि पश्यति ॥ तस्याहं न प्र

णश्यामि स च मे न प्रणश्यति ॥३०॥ सर्वभूत
स्थितं यो मां भजत्येकत्वमास्थितः ॥ सर्वथा
वर्तमानोपि स योगी मयि वर्तते ॥ आत्मौप
म्येन सर्वत्र समं पश्यति योर्जुन ॥ सुखं वा य
दि वा दुःखं स योगी परमो मतः ॥ ३२ ॥ अर्जु

गी.
८८
६

नउवाच ॥ योयंयोगस्त्वयाप्रोक्तः साम्येनम
धुसूदन ॥ एतस्याहंनपश्यामिचंचल
त्वात्स्थितिंस्थिराम् ॥ ३३ ॥ चंचलंहिमनः
कृष्णप्रमाथिबलवद्दृढम् ॥ तस्याहंनि
ग्रहंमन्येवायोरिवसुदुष्करं ॥ ३४ ॥ श्रीभग

वानुवाच ॥ असंशयंमहाबाहोमनोदुर्नि
ग्रहंचलम् । अभ्यासेनतुकौंतेयवैराग्ये
णचगृह्यते ॥ ३५ ॥ असंयतात्मनायोगोदुः
प्रापइतिमेमतिः ॥ वश्यात्मनातुयतता
शक्योवाप्तुमुपायतः ॥ ३६ ॥ अर्जुनउवाच

अयतिः श्रद्धयोपेतो योगाच्चलितमान
सः ॥ अप्राप्य योगसंसिद्धिं कां गतिं कृ
ष्ण गच्छति ॥ ३७ ॥ कच्चिन्नोभयविभ्रष्ट
श्छिन्नाभ्रमिव नश्यति ॥ अप्रतिष्ठो महा
बाहो विमूढो ब्रह्मणः पथि ॥ एतन्मे सं

शयंकृष्णछेत्तुमर्हस्यशेषतः॥त्वदन्यः
संशयस्यास्यछेत्तानह्युपपद्यते॥३९
श्रीभगवानुवाच॥पार्थनैवेहनामुत्रवि
नाशस्तस्यविद्यते॥नहिकल्याणकृ
त्कश्चिद्दुर्गतिंतातगच्छति॥४०॥प्राप्य

गी. ८.
६

पुण्यकृतांलोकानुषित्वाशाश्वतीःसमाः ॥
शुचीनांश्रीमतांगेहेयोगभ्रष्टोभिजायते ॥४
१॥अथवायोगिनामेवकुलेभवतिधीमताम्
एतद्धिदुर्लभतरंलोकेजन्मयदीदृशं ॥४
२॥तत्रतंबुद्धिसंयोगंलभतेपौर्वदेहिकम् ॥

यततेचततोभूयःसंसिद्धौकुरुनंदन ॥ ४३
पूर्वाभ्यासेनतेनैवह्रियतेह्यवशोपिसः ॥
जिज्ञासुरपियोगस्यशब्दब्रह्मातिवर्तते ॥ ४४
प्रयत्नाद्यतमानस्तुयोगीसंशुद्धकिल्बिष ः
अनेकजन्मसंसिद्धस्ततोयातिपरांगतिं । ४५

गी.
८६

तपस्विभ्योधिकोयोगीज्ञानिभ्योपिमतोधि
कः॥कर्मिभ्यश्चाधिकोयोगीतस्माद्योगीभ
वार्जुन॥४६॥योगिनामपिसर्वेषांमद्गतेनां
तरात्मना॥श्रद्धावान्भजतेयोमांसमेयुक्त
तमोमतः॥४७॥इतिश्रीभगवद्गीतासूपनि


षत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसं
वादेआत्मसंयमयोगोनामषष्ठोध्यायः ॥ ८
श्रीभगवानुवाच ॥ ॐमय्यासक्तमनाःपार्थ
योगंयुंजन्मदाश्रयः ॥ असंशयंसमग्रंमां
यथाज्ञास्यसितच्छृणु ॥१॥ ज्ञानंतेहंस

गी.
११
७

विज्ञानमिदंवक्ष्याम्यशेषतः॥यज्ज्ञात्वाने
हभूयोन्यज्ज्ञातव्यमवशिष्यते॥२॥मनुष्या
णांसहस्रेषुकश्चिद्यततिसिद्धये॥यतता
मपिसिद्धानांकश्चिन्मांवेत्तितत्त्वतः॥३॥
भूमिरापोनलोवायुःखंमनोबुद्धिरेवच॥







গী
৭

अहंकारइतीयंमेभिन्नाप्रकृतिरष्टधा॥४

अपरेयमितस्त्वन्यांप्रकृतिंविद्धिमेपराम्

जीवभूतांमहाबाहोययेदंधार्यतेजगत् ५

एतद्योनीनिभूतानिसर्वाणीत्युपधारय

अहंकृत्स्नस्यजगतःप्रभवःप्रलयस्तथा ८

गी. २३ ७

मत्तःपरतरंनान्यत्किंचिदस्तिधनंजय॥म
यिसर्वमिदंप्रोतंसूत्रेमणिगणाइव॥७॥
रसोहमप्सुकौंतेयप्रभास्मिशशिसूर्य
योः॥प्रणवःसर्ववेदेषुशब्दःखेपौरुषंनृ
षु॥८॥पुण्योगंधःपृथिव्यांचतेजश्चास्मि

विभावसौ ॥ जीवनंसर्वभूतेषुतपश्चास्मि·
तपस्विषु ॥ ९ ॥ बीजंमांसर्वभूतानांविद्धि·
पार्थंसनातनम् ॥ बुद्धिर्बुद्धिमतामस्मि
तेजस्तेजस्विनामहम् ॥ १० ॥ बलंबलवतां
चाहंकामरागविवर्जितम् ॥ धर्माविरुद्धो

गी.
७४
७

भूतेषुकाम्मोस्मिभरतर्षभ ॥११॥ येचैवसात्विका
भावाराजसास्तामसाश्चये ॥ मत्तएवेतितान्
विद्धिनत्वहंतेषुतेमयि ॥१२॥ त्रिभिर्गुणम
यैर्भावैरेभिःसर्वमिदंजगत् ॥ मोहितंना
भिजानातिमामेभ्यःपरमव्ययम् ॥१३॥ दै

वी ह्येषा गुणमयी मम माया दुरत्यया ॥ मा

मेव ये प्रपद्यंते मायामेतां तरंति ते ॥ १४ ॥ न मां

दुष्कृतिनो मूढाः प्रपद्यंते नराधमाः ॥ मा

ययापहृतज्ञाना आसुरं भावमाश्रिताः ॥ १५

चतुर्विधा भजंते मां जनाः सुकृतिनोर्जुन

गी.
१५
७

आर्त्तोजिज्ञासुरर्थार्थीज्ञानीचभरतर्षभ॥
तेषांज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यते
प्रियोहिज्ञानिनोत्यर्थमहंसचममप्रियः
उदाराःसर्वएवैतेज्ञानीत्वात्मैवमेमतम्॥
आस्थितःसहियुक्तात्मामामेवानुत्तमां

गतिम् ॥१८॥ बहूनांजन्मनामंतेज्ञानवा
न्मांप्रपद्यते ॥ वासुदेवःसर्वमितिसमहा
त्मासुदुर्लभः ॥ कामैस्तैस्तैर्हृतज्ञानाःप्र
पद्यंतेन्यदेवताः ॥ तंतंनियममास्थाय
प्रकृत्यानियताःस्वया ॥२०॥ योयोयांयां

नुंभक्तःश्रद्धयार्चितुमिच्छति ॥ तस्यत·
स्याचलांश्रद्धांतामेवविदधाम्यहम् ॥२१॥
सतयाश्रद्धयायुक्तस्तस्याराधनमीहते ॥
लभतेचततःकामान्मयैवविहितान्हि
तान् ॥२२॥ अंतवत्तुफलंतेषांतद्भवत्यल्पमे

धसाम् ॥ देवान्देवयजोयांतिमद्भक्तायां
तिमामपि ॥२३॥ अव्यक्तंव्यक्तिमापन्नंमन्यं
तेमामबुद्धयः ॥ परंभावमजानंतोममाव्य
यमनुत्तमम् ॥२४॥ नाहंप्रकाशःसर्वस्य
योगमायासमावृतः ॥ मूढोयंनाभिजाना

नातिलोकोमामजमव्ययम् ॥२५॥ वेदाहंस
मतीतानिवर्तमानानिचार्जुन ॥ भविष्याणि
चभूतानिमांतुवेदनकश्चन ॥ इच्छाद्वेषस-
मुत्थेनद्वंद्वमोहेनभारत ॥ सर्वभूतानिसं
मोहंसर्गेयांतिपरंतप ॥२७॥ येषांत्वंतगतं

पापंजनानांपुण्यकर्मणाम्॥ नेद्वंद्वमोहा
निद्रेक्ताभजेतेमोहछद्मना॥२४॥ जरामरण
मोदायमाभास्त्रिमयतेनिये॥ नेत्रलनहि
दुःकृन्तमथ्यात्मकर्मचाखिलम्॥२५॥
मापिभूनायिदैवंमोमायियतेवयेविडः

गी. ९७

प्रयाणकालेपिचमांतेविदुर्युक्तचेतसः
इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्याया-
योगशास्त्रेश्रीकृष्णार्जुनसंवादेज्ञानवि
ज्ञानयोगोनामसप्तमोध्यायः॥७॥अर्जुन
उवाच॥ॐकिंतद्ब्रह्मकिमध्यात्मंकिं-



परशुराम ८



श्री

८

कर्मपुरुषोत्तम ॥ अधिभूतंचकिंप्रोक्तम

धिदैवंकिमुच्यते ॥ १ ॥ अधियज्ञःकथंको

त्रदेहेस्मिन्मधुसूदन ॥ प्रयाणकालेचक

थंज्ञेयोसिनियतात्मभिः ॥ २ ॥ श्रीभगवानु

वाच ॥ अक्षरंब्रह्मपरमंस्वभावोध्यात्मम

गी. १९८

च्यते ॥ भूतभावोद्भवकरो विसर्गः कर्मसं
ज्ञितः ॥३॥ अधिभूतं क्षरो भावः पुरुषश्चा
धिदैवतम् ॥ अधियज्ञोहमेवात्र देहे देह
भृतांवर ॥४॥ अंतकालेच मामेव स्मरन्मु
क्त्वाकलेवरं ॥ यः प्रयाति समद्भावं याति

नास्त्यत्रसंशयः ॥५॥ यंयंवापिस्मरन्भा
वंत्यजत्यंतेकलेवरम् ॥ तंतमेवैतिकौंते
यसदातद्भावभावितः ॥ तस्मात्सर्वेषु
कालेषुमामनुस्मरयुध्यच ॥ मय्यर्पित
मनोबुद्धिर्मामेवैष्यस्यसंशयः ॥७॥ प्र

भ्यासयोगयुक्तेनचेतसानन्यगामिना ॥ प
रमंपुरुषंदिव्यंयातिपार्थानुचिंतयन् ॥ ८
कविंपुराणमनुशासितारमणोरणीयां
समनुस्मरेद्यः ॥ सर्वस्यधातारमचिंत्यरू
पमादित्यवर्णंतमसःपरस्तात् ॥ ९ ॥ प्रया

णकालेमनसाचलेनभक्त्यायुक्तोयोगबा-
लेनचैव॥भ्रुवोर्मध्येप्राणमावेश्यसम्य-
क्सतंपरंपुरुषमुपैतिदिव्यम्॥१०॥यदक्ष-
रंवेदविदोवदंतिविशंतियद्यतयोवीत-
रागाः॥यदिच्छंतोब्रह्मचर्यंचरंतितत्तेप

गी. अ. ८

दंसंग्रहेणप्रवक्ष्ये ॥११॥ सर्वद्वाराणिसंयम्य
मनोहृदिनिरुध्यच ॥ मूर्ध्न्याधायात्मनःप्रा
णमास्थितोयोगधारणाम् ॥ ॐमित्येका-
क्षरंब्रह्मव्याहरन्मामनुस्मरन् ॥ यःप्रया
तित्यजन्देहंसयातिपरमांगतिम् ॥१३॥ य

नन्यचेताःसततंयोमांस्मरतिनित्यशः
तस्याहंसुलभःपार्थनित्ययुक्तस्ययोगि
नः॥१४॥मामुपेत्यपुनर्जन्मदुःखालयम
शाश्वतम्॥नाप्नुवंतिमहात्मानःसंसि
द्धिंपरमांगताः॥१५॥आब्रह्मभुवनाल्लो

काः पुनरावर्तिनोर्जुन ॥ मामुपेत्य तु कौं
तेय पुनर्जन्म न विद्यते ॥१६॥ सहस्रयु-
गपर्यंतमहर्यद्ब्रह्मणो विदुः ॥ रात्रिं यु-
गसहस्रांतां तेहोरात्रविदो जनाः ॥१७॥
अव्यक्ताद्व्यक्तयः सर्वाः प्रभवंत्यहरागा

मे॥ रात्र्यागमेप्रलीयंतेतत्रैवाव्यक्तसं
ज्ञके॥ १८॥ भूतग्रामःसएवायंभूत्वा
भूत्वाप्रलीयते॥ रात्र्यागमेवशःपा
र्थप्रभवत्यहरागमे॥ १९॥ परस्तस्मा
त्तुभावोन्योव्यक्तोव्यक्तात्सनातनः

गी॰
८३
८

नः॥ यःससर्वेषुभूतेषुनश्यत्सुनवि-
नश्यति॥२०॥अव्यक्तोऽक्षरइत्युक्तस्त
माहुःपरमांगतिम्॥यंप्राप्यननिव
र्तंतेतद्धामपरमंमम॥२१॥पुरुषः
सपरःपार्थभक्त्यालभ्यस्त्वनन्यया


यस्यांतःस्थानि भूतानि येन सर्वमिदं त
तम् ॥ २२ ॥ यत्र काले त्वनावृत्तिमावृत्तिं
चैव योगिनः ॥ प्रयाता यांति तं कालं व
क्ष्यामि भरतर्षभ ॥ २३ ॥ अग्निर्ज्योतिर
हः शुक्लः षण्मासा उत्तरायणम् ॥ त

त्रप्रयातागच्छंतिब्रह्मब्रह्मविदोजना
धूमोरात्रिस्तथाकृष्णःषण्मासादक्षि-
णायनम्॥तत्रचांद्रमसंज्योतिर्योगी-
प्राप्यनिवर्तते॥२५॥शुक्लकृष्णेगतीह्ये
तेजगतःशाश्वतेमते॥एकयायात्य-

नावृत्तिमन्ययावर्ततेपुनः॥२६॥नैतेसृ
तीपार्थजानन्योगीमुह्यतिकश्चन॥त
स्मात्सर्वेषुकालेषुयोगयुक्तोभवार्जुन २
वेदेषुयज्ञेषुतपःसुचैवदानेषुयत्पु
ण्यफलंप्रदिष्टम्॥अत्येतितत्सर्व

मिदं विदित्वा योगी परं स्थानमुपैति चा
द्यम् ॥२८॥ इति श्रीभगवद्गीतासूपनि
षत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृ
ष्णार्जुनसंवादे महापुरुषयोगो नामा
ष्टमोध्यायः ॥८॥

ਰਾਮਚਦ੍ਰ ੮



गी

५५

श्रीभगवानुवाच ॥ ॐ इदं तु ते गुह्यतमं प्रवक्ष्या
म्यनसूयवे ॥ ज्ञानं विज्ञानसहितं यज्ज्ञात्वा
मोक्ष्यसेऽशुभात् ॥ १ ॥ राजविद्या राजगुह्यं
पवित्रमिदमुत्तमम् ॥ प्रत्यक्षावगमं धर्
म्यं सुसुखं कर्तुमव्ययम् ॥ २ ॥ अश्रद्दधाना

गी.
५८

पुरुषाधर्मस्यास्यपरंतप ॥ अप्राप्यमांनिव
र्तंतेमृत्युसंसारवर्त्मनि ॥ ३ ॥ मयाततमिदं
सर्वंजगदव्यक्तमूर्तिना ॥ मत्स्थानिसर्व
भूतानिनचाहंतेष्ववस्थितः ॥ ४ ॥ नचमत्
स्थानिभूतानिपश्यमेयोगमैश्वरम् ॥ भू

तभृन्नचभूतस्थोममात्माभूतभावनः॥५
यथाकाशस्थितोनित्यंवायुःसर्वत्रगोम-
हान्॥तथासर्वाणिभूतानिमत्स्थानीत्युप
धारय॥६॥सर्वभूतानिकौंतेयप्रकृतिंयांति
मामकीम्॥कल्पक्षयेपुनस्तानिक-

गी

८०

ल्यादौ विसृजाम्यहम् ॥ ७ ॥ प्रकृतिं स्वाम-
वष्टभ्य विसृजामि पुनः पुनः ॥ भूतग्राम
मिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥ न
च मां तानि कर्माणि निबध्नंति धनंजय
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥

मयाध्यक्षेणप्रकृतिःसूयतेसचराचर॥
हेतुनानेनकौंतेयजगद्विपरिवर्तते॥१०॥
अवजानंतिमांमूढामानुषींतनुमाश्रि
तम्॥ परंभावमजानंतोममभूतमहेश्व-
रम्॥११॥ मोघाशामोघकर्माणोमोघज्ञा

गी.

८८

नाविचेतसः ॥ राक्षसीमासुरींचैवप्रकृतिं
मोहिनींश्रिताः ॥१२॥ महात्मानस्तुमांपार्थ
दैवींप्रकृतिमाश्रिताः ॥ भजंत्यनन्यमनसो
ज्ञात्वाभूतादिमव्ययम् ॥१३॥ सततंकीर्तयं
तोमांयतंतश्चदृढव्रताः ॥ नमस्यंतश्च

से भन्न्यानिन्यपुक्ताउपासने ॥ ४ ॥ नानय
तेनवाण्णेयजेनोमान्त्रपासने ॥ एकवेन
हृष्यन्केनवहुयाविश्वनोह्नखम ॥ श्रहे
केन्नहेयतःखयाह्रमह्रमौषयम ॥ मे·
तेह्रमह्रमेवाज्यमह्रमग्निहेह्रनम ॥ १८

पिताहमस्यजगतोमाताधातापितामहः
वेद्यंपवित्रमोंकारऋक्सामयजुरेवच॥१७
गतिर्भर्ताप्रभुःसाक्षीनिवासःशरणंसुहृ
त्॥प्रभवःप्रलयःस्थानंनिधानंबीज
मव्ययम्॥१८॥तपाम्यहमहंवर्षंनिगृह्णा

मुत्तजालमिव ॥ अन्नं ते चेव वह्नसुअसद
सस्थाहसमज्जेन ॥१४॥ देवियामोसोमणाः
हनपापाय ते निष्क्रा स्वर्गं निश्राध्येयंते ॥ ते
पुण्यमामाय स्तें इंद्रलोकमध्ये निदिव्या
न्दिवि देवभोगान् ॥१५॥ ते ते भुक्त्वा स्वर्गं

गी.

५०

लोकंविशालेक्षीणेपुण्येमर्त्यलोकंवि
शंति॥एवंत्रयीधर्ममनुप्रपन्नागतागतं
कामकामालभंते॥२१॥अनन्याश्चिंतयं
तोमांयेजनाःपर्युपासते॥तेषांनित्याभि
युक्तानांयोगक्षेमंवहाम्यहम॥२२॥येप्य

न्यदेवताभक्तायजंतेश्रद्धयान्विताः॥ते
पिमामेवकौंतेययजंत्यविधिपूर्वकम्॥ २३
अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवच॥न
तुमामभिजानंतितत्वेनातश्च्यवंतिते॥२४॥
यांतिदेवव्रतादेवान्पितॄन्यांतिपितृव्रताः

गी.

९

९९

भूतानि यांति भूतेज्या यांति मद्याजिनो-
पि माम् ॥ २५ ॥ पत्रं पुष्पं फलं तोयं यो मे
भक्त्या प्रयच्छति ॥ तदहं भक्त्युपहृतम
श्नामि प्रयतात्मनः ॥ २६ ॥ यत्करोषि य-
दश्नासि यज्जुहोषि ददासि यत् ॥ यत्त

पस्यसि कौंतेय तत्कुरुष्व मदर्पणम् ॥२७॥
शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः
संन्यासयोगयुक्तात्मा विमुक्तो मामुपै
ष्यसि ॥२८॥ समोहं सर्वभूतेषु न मे द्वेष्यो
स्ति न प्रियः ॥ ये भजंति तु मां भक्त्या मयि


गी.
५२
९

तेतेषुचाप्यहम्॥२९॥अपिचेत्सुदुराचारो
भजतेमामनन्यभाक्॥साधुरेवसमंतव्यः
सम्यग्व्यवसितोहिसः॥क्षिप्रंभवतिधर्मा
त्माशश्वच्छांतिंनिगच्छति॥कौंतेयप्रति
जानीहिनमेभक्तःप्रणश्यति॥३१॥मांहि

पार्थव्यपाश्रित्ययेपिस्युःपापयोनयः॥
स्त्रियोवैश्यास्तथाशूद्रास्तेपियांतिपरां·
गतिम्॥३२॥किंपुनर्ब्राह्मणाःपुण्याभ·
क्ताराजर्षयस्तथा॥अनित्यमसुखंलोक
मिमंप्राप्यभजस्वमाम्॥३३॥मन्मनाभव

गी.
५३


मद्भक्तोमद्याजीमांनमस्कुरु ॥ मामेवैष्य
सियुक्त्वैवमात्मानंमत्परायणः ॥ ३४ ॥
इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्या
यांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेराज
विद्याराजगुह्ययोगोनामनवमोध्यायः



श्री

१०

श्रीभगवानुवाच ॥ ॐ भूयएवमहाबाहोशृ
णुमेपरमंवचः ॥ यत्तेहंप्रीयमाणायवक्ष्या
मिहितकाम्यया ॥ १ ॥ नमेविदुःसुरगणाः
प्रभवंनमहर्षयः ॥ अहमादिर्हिदेवानांम
हर्षीणांचसर्वशः ॥ २ ॥ योमामजमनादिं

चवेत्तिलोकमहेश्वरम् ॥ असंमूढःसमर्
त्येषुसर्वपापैःप्रमुच्यते ॥३॥ बुद्धिर्ज्ञानम
संमोहःक्षमासत्यंदमःशमः ॥ सुखंदुःखं
भवोभावोभयंचाभयमेवच ॥४॥ अहिंसा
समतातुष्टिस्तपोदानंयशोयशः ॥ भवं

तिर्भवंतिभूतानांमत्तएवपृथग्विधाः॥म
हर्षयःसप्तपूर्वेचत्वारोमनवस्तथा॥म
द्भावामानसाजातायेषांलोकइमाःप्रजाः ८
एतांविभूतिंयोगंचममयोवेत्तितत्त्वतः॥
सोविकंपेनयोगेनयुज्यतेनात्रसंशयः॥ ७

गी.

८५

१०

अहंसर्वस्यप्रभवोमत्तःसर्वंप्रवर्तते ॥ इ
तिमत्वाभजंतेमांबुधाभावसमन्विताः
मच्चित्तामद्गतप्राणाबोधयंतःपरस्परं
कथयंतश्चमांनित्यंतुष्यंतिचरमंतिच ॥
तेषांसततयुक्तानांभजतांप्रीतिपूर्वकम

ददामिबुद्धियोगंतंयेनमामुपयांतिते
तेषामेवानुकंपार्थमहमज्ञानजंतमः
नाशयाम्यात्मभावस्थोज्ञानदीपेनभा
स्वता ॥११॥ अर्जुनउवाच ॥ परंब्रह्मपरंधा
मपवित्रंपरमंभवान ॥ पुरुषंशाश्वतं

दिव्यमादिदेवमजंविभुम॥ आहुस्त्वामृ
षयःसर्वेदेवर्षिर्नारदस्तथा॥ असितोदे
वलोव्यासःस्वयंचैवब्रवीषिमे॥१३॥सर्व
मेतदृतंमन्येयन्मांवदसिकेशव॥नहि
तेभगवन्व्यक्तिंविदुर्देवानदानवाः॥१४

स्वयमेवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम
भूतभावन भूतेश देवदेव जगत्पते ॥१५॥
वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य
तिष्ठसि ॥१६॥ कथं विद्यामहं योगिंस्त्वां स

दापरिचिंतयन्॥ केषुकेषुचभावेषुचिं
त्योसिभगवन्मया॥१७॥विस्तरेणात्मनो
योगंविभूतिंचजनार्दन॥भूयःकथयतृ
प्तिर्हिशृण्वतोनास्तिमेऽमृतम्॥१८॥श्री
भगवानुवाच॥हंततेकथयिष्यामिदि

व्याह्यात्मविभूतयः ॥ प्राधान्यतःकुरु
श्रेष्ठनास्त्यंतोविस्तरस्यमे ॥ अहमात्मा
गुडाकेशसर्वभूताशयस्थितः ॥ अह-
मादिश्चमध्यंचभूतानामंतएवच ॥२०॥
आदित्यानामहंविष्णुर्ज्योतिषांरविरंशु

गी.
५८
१०

मान्॥मरीचिर्मरुतामस्मिनक्षत्राणा
महंशशी॥२१॥वेदानांसामवेदोस्मिदे
वानामस्मिवासवः॥इंद्रियाणांमनश्चा
स्मिभूतानामस्मिचेतना॥२२॥रुद्राणां
शंकरश्चास्मिवित्तेशोयक्षरक्षसाम॥

वसूनां पावकश्चास्मि मेरुः शिखरिणाम

हम् ॥ पुरोधसां च मुख्यं मां विद्धि पार्थ बृह

स्पतिम् ॥ सेनानीनामहं स्कंदः सरसामस्मि

स्मि सागरः ॥ २४ ॥ महर्षीणां भृगुरहं गि

रामस्म्येकमक्षरम् ॥ यज्ञानां जपयज्ञो-

गी
५५
१०

स्मि स्थावराणां हिमालयः ॥५॥ अश्वत्थः
सर्ववृक्षाणां देवर्षीणां च नारदः ॥ गंधर्वा
णां चित्ररथः सिद्धानां कपिलो मुनिः ॥ उ
चैःश्रवसमश्वानां विद्धि माममृतोद्भवम
ऐरावतं गजेंद्राणां नराणां च नराधिपं ॥ २

आयुधानामहंवज्रंधेनूनामस्मिकामधुक्
प्रजनश्चास्मिकंदर्पःसर्पाणामस्मिवासु
किः॥२८॥अनंतश्चास्मिनागानांवरुणो
यादसामहम्॥पितृणामर्यमाचास्मिय
मःसंयमनामहम्॥२९॥प्रह्लादश्चास्मिदै

गी. १०

त्यानांकालःकलयतामहम॥मृगाणां
चमृगेंद्रोहंवैनतेयश्चपक्षिणाम्॥३०॥
पवनःपवतामस्मिरामःशस्त्रभृतामहं
झषाणांमकरश्चास्मिस्रोतसामस्मिजा
ह्नवी॥३१॥सर्गाणामादिरंतश्चमध्यंचैवा

हमर्जुन॥ अध्यात्मविद्याविद्यानांवादः

प्रवदतामहम्॥३२॥ अक्षराणामकारो

स्मिद्वंद्वःसामासिकस्यच॥ अहमेवाक्ष

यःकालोधाताहंविश्वतोमुखः॥३३॥

मृत्युःसर्वहरश्चाहमुद्भवश्चभविष्यतां

कीर्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्ष
मा ॥ ३४ ॥ बृहत्साम तथा साम्नां गायत्री छंद
सामहम् ॥ मासानां मार्गशीर्षोहमृतूनां कु
सुमाकरः ॥ ३५ ॥ द्यूतं छलयतामस्मि तेज
स्तेजस्विनामहम् ॥ जयोस्मि व्यवसायोस्मि


सत्त्वं सत्त्ववतामहम् ॥ ३६ ॥ वृष्णीनां वासुदेवो
स्मि पांडवानां धनंजयः ॥ मुनीनामप्यहं व्या
सः कवीनामुशना कविः ॥ दंडो दमयताम
स्मि नीतिरस्मि जिगीषताम् ॥ मौनं चैवाऽस्मि
गुह्यानां ज्ञानं ज्ञानवतामहम् ॥ ३८ ॥ यच्चा

गी.
१२
१०

पि सर्वभूतानां बीजं तदहमर्जुन ॥ न तदस्ति
विना यत्स्यान्मया भूतं चराचरम् ॥३९॥ नांतो
स्ति मम दिव्यानां विभूतीनां परंतप ॥ एष तू
देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥४०॥ य
द्यद्विभूतिमत्सत्वं श्रीमदूर्जितमेव वा ॥ तत्त

देवावगच्छ त्वं मम तेजोंशसंभवम्॥ अथवा
बहुनैतेन किं ज्ञातेन तवार्जुन॥ विष्टभ्या-
हमिदं कृत्स्नमेकांशेन स्थितो जगत्॥४२
इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्या-
यां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभू

तियोगोनामदशमोध्यायः ॥१०॥ अर्जुनउवाच ॥ ॐमदनुग्रहायपरमंगुह्यमध्यात्मसंज्ञितम् ॥ यत्त्वयोक्तंवचस्तेनमोहोयंविगतोमम ॥१॥ भवाप्ययौहिभूतानांश्रुतौविस्तरशोमया ॥ त्वत्तःकमलपत्राक्षमा



बुधा १०



श्री

९९

हात्म्यमपिचाव्ययम् ॥२॥ एवमेतद्यथात्थ
त्वमात्मानंपरमेश्वर ॥ द्रष्टुमिच्छामिते रू
पमैश्वरंपुरुषोत्तम ॥ मन्यसेयदितच्छक्यं
मयाद्रष्टुमितिप्रभो ॥ योगेश्वरततोमेत्वं
दर्शयात्मानमव्ययम् ॥४॥ श्रीभगवानुवाच

पश्यमेपार्थरूपाणिशतशोथसहस्र
शः॥नानाविधानिदिव्यानिनानावर्णा
कृतीनिच॥५॥पश्यादित्यान्वसून्रुद्रा
नश्विनौमरुतस्तथा॥बहून्यदृष्टपूर्वा
णिपश्याश्चर्याणिभारत॥६॥इहैकस्थं

जगत्कृत्स्नंपश्याद्यसचराचरम् ॥ ममदे
हेगुडाकेशयच्चान्यद्द्रष्टुमिच्छसि ॥७॥
नतुमांशक्यसेद्रष्टुमनेनैवस्वचक्षुषा ।
दिव्यंददामितेचक्षुःपश्यमेयोगमैश्वरं

प

संजयउवाच ॥ एवमुक्त्वाततोराजन्महा

गी.
८५
११

योगेश्वरोहरिः ॥ दर्शयामासपार्थायपर
मंरूपमैश्वरम् ॥९॥ अनेकवक्त्रनयनमने
काद्भुतदर्शनम् । अनेकदिव्याभरणंदि
व्यानेकोद्यतायुधम् ॥१०॥ दिव्यमाल्यांब
रधंदिव्यगंधानुलेपनम् ॥ सर्वाश्चर्यमयं

यंदेवमनंतंविश्वतोमुखम्॥११॥दिविसू
र्यसहस्रस्यभवेद्युगपदुत्थिता॥यदिभाः
सदृशीसास्याद्भासस्तस्यमहात्मनः॥त
त्रैकस्थंजगत्कृत्स्नंप्रविभक्तमनेकधा॥
अपश्यद्देवदेवस्यशरीरेपांडवस्तदा॥१३

गी.
२८
११

ततःसविस्मयाविष्टोहृष्टरोमाधनंजयः
प्रणम्यशिरसादेवंकृतांजलिरभाषत॥
अर्जुनउवाच॥ पश्यामिदेवांस्तवदेवदेहे
सर्वांस्तथाभूतविशेषसंघान्॥ ब्रह्माण
मीशंकमलासनस्थमृषींश्चसर्वानुरगां

श्चदिव्यान्‌ ॥५॥ अनेकबाहूदरवक्त्रनेत्रंप
श्यामित्वांसर्वतोनंतरूपम्‌ ॥ नांतंनमध्यं
नपुनस्तवादिंपश्यामिविश्वेश्वरविश्वरू
पम्‌ ॥६॥ किरीटिनंगदिनंचक्रिणंचतेजो
राशिंसर्वतोदीप्तिमंतम्‌ ॥ पश्यामित्वांदु

गी.

११

निरीक्ष्यं समंताद्दीप्तानलार्कद्युतिमप्रमेयं
त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य प
रं निधानम्॥ त्वमव्ययः शाश्वतधर्मगोप्ता
सनातनस्त्वं पुरुषो मतो मे॥१८॥ अनादिम
ध्यांतमनंतवीर्यमनंतबाहुं शशिसूर्यने

नेत्रम्॥ पश्यामि त्वां दीप्तहुताशवक्त्रं स्व
तेजसा विश्वमिदं तपंतम्॥१९॥ द्यावापृ
थिव्योरिदमंतरं हि व्याप्तं त्वयैकेन दिश
श्च सर्वाः॥ दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लो
कत्रयं प्रव्यथितं महात्मन्॥२०॥ अमी

हित्वासुरसंघाविशंतिकेचिद्भीताःप्रांज
लयोगृणंति ॥ स्वस्तीत्युक्त्वामहर्षिसिद्ध
संघाःस्तुवंतित्वांस्तुतिभिःपुष्कलाभिः
रुद्रादित्यावसवोयेचसाध्याविश्वेश्वि
नौमरुतश्चोष्मपाश्च ॥ गंधर्वयक्षासुर·

सिद्धसंघावीक्षंतेत्वांविस्मिताश्चैवसर्वे ॥ २२
रूपंमहत्तेबहुवक्त्रनेत्रंमहाबाहोबहुबा
हूरुपादम् ॥ बहूदरंबहुदंष्ट्राकरा
लंदृष्ट्वालोकाःप्रव्यथितास्तथाहम् ॥ २३
नभःस्पृशंदीप्तमनेकवर्णंव्यात्ताननं

दीप्तविशालनेत्रम् ॥ दृष्ट्वा हि त्वां प्रव्यथिता-
न्तरात्मा धृतिं न विंदामि शमं च विष्णो
दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव काल
नलसन्निभानि ॥ दिशो न जाने न लभे च श-
र्म प्रसीद देवेश जगन्निवास ॥ २५ ॥ अमी

चत्वांधृतराष्ट्रस्यपुत्राःसर्वेसहैवावनि-
पालसंघैः॥भीष्मोद्रोणःसूतपुत्रस्तथा
सौसहास्मदीयैरपियोधमुख्यैः॥२६॥
वक्त्राणितेत्वरमाणाविशंतिदंष्ट्राकरा
लानिभयानकानि॥केचिद्विलग्नादश-

गी.
११

शनांतरेषुसंदृश्यंतेचूर्णितैरुत्तमांगैः॥२७
यथानदीनांबहवोंबुवेगाःसमुद्रमेवा
भिमुखाद्रवंति॥तथातवामीनरलोक
वीराःविशंतिवक्त्राण्यभिविज्वलंति॥२८
यथाप्रदीप्तंज्वलनंपतंगाविशंतिनाश

यसमृद्धवेगाः ॥ तथैव नाशाय विशंति

लोकास्तवापि वक्त्राणि समृद्धवेगाः ॥ २९

लेलिह्यसे ग्रसमानः समंताल्लोकान्सम

ग्रान्वदनैर्ज्वलद्भिः ॥ तेजोभिरापूर्य जग

त्समग्रं भासस्तवोग्राः प्रतपंति विष्णो ॥ ३०

आख्याहिमेकोभवानुग्ररूपोनमोस्तुते
देववरप्रसीद ॥ विज्ञातुमिच्छामिभवंत
माद्यंनहिप्रजानामितवप्रवृत्तिं ॥ ३१ ॥
श्रीभगवानुवाच ॥ कालोस्मिलोकक्षय
कृत्प्रवृद्धोलोकान्समाहर्तुमिहप्रवृ-

त्तः ॥ ऋतेपित्वांनभविष्यंतिसर्वेयेवस्थि
ताःप्रत्यनीकेषुयोधाः॥ तस्मात्वमुत्तिष्ठ
यशोलभस्वजित्वाशत्रून्भुंक्ष्वराज्यंसमृ
द्धम् ॥ मयैवैतेनिहताःपूर्वमेवनिमि
त्तमात्रंभवसव्यसाचिन् ॥ ३३ ॥ द्रोणंच

भीष्मंचजयद्रथंचकर्णंतथान्यानपियो
धवीरान्॥मयाहतांस्त्वंजहिमाव्यथि·
ष्ठायुध्यस्वजेतासिरणेसपत्नान्॥३४॥
संजयउवाच॥एतच्छ्रुत्वावचनंकेश·
वस्यकृतांजलिर्वेपमानःकिरीटी॥न

मस्कृत्वाभूयएवाहकृष्णंसगद्गदंभीत
भीतःप्रणम्य ॥३५॥ अर्जुनउवाच ॥ स्था-
नेहृषीकेशतवप्रकीर्त्याजगत्प्रहृष्य
त्यनुरज्यतेच ॥ रक्षांसिभीतानिदिशोद्र
वंतिसर्वेनमस्यंतिचसिद्धसंघाः ॥३६॥

कस्माच्चतेननमेरन्महात्मन्गरीयसेब्रह्म
णोप्यादिकर्त्रे ॥ अनंतदेवेशजगन्निवास
त्वमक्षरंसदसत्तत्परंयत् ॥ ३७ ॥ त्वमादि
देवःपुरुषःपुराणस्त्वमस्यविश्वस्यपरं
निधानम् ॥ वेत्तासिवेद्यंचपरंचधामत्वया

ततंविश्वमनंतरूप ॥३८॥ वायुर्यमोग्निर्वरु
णःशशांकःप्रजापतिस्त्वंप्रपितामह
श्च ॥ नमोनमस्तेस्तुसहस्रकृत्वःपुनश्च
भूयोपिनमोनमस्ते ॥३९॥ नमःपुरस्तादथ
पृष्ठतस्तेनमोस्तुतेसर्वतएवसर्व ॥ अनं

गी.
११४
११

न्तवीर्यामितविक्रमस्त्वंसर्वंसमाप्नोषिततो
सिसर्वः॥४०॥सखेतिमत्वाप्रसभंयदुक्तंहे
कृष्णहेयादवहेसखेति॥अजानतामहि-
मानंतवेदंमयाप्रमादात्प्रणयेनवापि॥४१॥
यच्चावहासार्थमसत्कृतोसिविहारशय्या

सनभोजनेषु ॥ एकोथवाप्यच्युततत्सम
क्षंतत्क्षामयेत्वामहमप्रमेयम् ॥ ४२ ॥ पि
तासिलोकस्यचराचरस्यत्वमस्यपूज्यश्च
गुरुर्गरीयान् ॥ नत्वत्समोस्त्यभ्यधिकः कु
तोन्योलोकत्रयेप्यप्रतिमप्रभावः ॥ ४३

गी.
११५
११

तस्मात्प्रणम्यप्रणिधायकायंप्रसादयेत्व
महमीशमीड्यम्॥ पितेवपुत्रस्यसखेवस
ख्युःप्रियःप्रियायार्हसिदेवसोढुम्॥४४
अदृष्टपूर्वंहृषितोस्मिदृष्ट्वाभयेनचप्रव्य
थितंमनोमे॥ तदेवमेदर्शयदेवरूपंप्रसी

द देवेश जगन्निवास ॥ ४५ ॥ किरीटिनं गदि
नं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव
विश्वमूर्ते ॥ ४६ ॥ श्रीभगवानुवाच ॥ म
या प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितम

गी. ११

मात्मयोगात् ॥ तेजोमयंविश्वमनंतमाद्यं
यन्मेत्वदन्येननदृष्टपूर्वम् ॥४७॥ नवेदय
ज्ञाध्ययनैर्नदानैर्नचक्रियाभिर्नतपोभि
रुग्रैः ॥ एवंरूपःशक्यअहंनृलोकेद्रष्टुं
त्वदन्येनकुरुप्रवीर ॥४८॥ मातेव्यथामा

चविमूढभावोदृष्ट्वारूपंघोरमीदृङ्ममे
दम्॥ व्यपेतभीःप्रीतमनाःपुनस्त्वंतदेव
मेरूपमिदंप्रपश्य॥ ४९॥ संजयउवाच॥
इत्यर्जुनंवासुदेवस्तथोक्त्वास्वकंरूपंद
र्शयामासभूयः॥ आश्वासयामासचभी

गी॰

११

नमेनंभूत्वापुनःसौम्यवपुर्महात्मा ॥ ५० ॥
अर्जुनउवाच ॥ दृष्ट्वेदंमानुषंरूपंतवसौम्य
जनार्दन ॥ इदानीमस्मिसंवृत्तःसचेताःप्र
कृतिंगतः ॥ ५१ ॥ श्रीभगवानुवाच ॥ सुदुर्दर्श
मिदंरूपंदृष्टवानसियन्मम ॥ देवाअप्य


स्य रूपस्य नित्यं दर्शनकांक्षिणः ॥ ५२ ॥ ना
हं वेदैर्न तपसा न दानेन न चेज्यया ॥ शक्य
एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ भ
क्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥ ५४

गी.
११

मत्कर्मकृन्मत्परमोमद्भक्तःसंगवर्जितः
निर्वैरःसर्वभूतेषुयःसमामेतिपांडव ॥५॥
इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्या
यांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेविश्व
रूपदर्शनंनामैकादशोध्यायः ॥ ॥ ॥ श्री.



कर्कि ॥



अर्जुनउवाच॥ एवंसततयुक्तायेभक्ता
स्त्वांपर्युपासते॥ येचाप्यक्षरमव्यक्तंतेषां
केयोगवित्तमः॥१॥श्रीभगवानुवाच॥म
य्यावेश्यमनोयेमांनित्ययुक्ताउपासते
श्रद्धयापरयोपेतास्तेमेयुक्ततमामताः २

गी.
१२

येत्वक्षरमनिर्देश्यमव्यक्तंपर्युपासते ॥ स
र्वत्रगमचिंत्यंचकूटस्थमचलंध्रुवम् ॥ ३ ॥
संनियम्येंद्रियग्रामंसर्वत्रसमबुद्धयः ॥ ते
प्राप्नुवंतिमामेवसर्वभूतहितेरताः ॥ ४ ॥
क्लेशोधिकतरस्तेषामव्यक्तासक्तचेतसा.

साम्॥ अव्यक्ताहिगतिर्दुःखंदेहवद्भिर
वाप्यते॥ येतुसर्वाणिकर्माणिमयिसं
न्यस्यमत्पराः॥ अनन्येनैवयोगेनमांध्या
यंतउपासते॥६॥ तेषामहंसमुद्धर्ता
मृत्युसंसारसागरात्॥ भवामिनचिरात्पा

गी.
१२०
१२

षांमय्यावेशितचेतसाम् ॥ मय्येवमनआ
धत्स्वमयिबुद्धिंनिवेशय ॥ निवसिष्यसि
मय्येवअतऊर्ध्वंनसंशयः ॥ ८ ॥ अथ
चित्तंसमाधातुंनशक्नोषिमयिस्थिरं ॥
अभ्यासयोगेनततोमामिच्छाप्तुंधनंजय

अभ्यासेप्यसमर्थोसि मत्कर्मपरमोभव
मदर्थमपिकर्माणि कुर्वन्सिद्धिमवाप् स्य
स्यसि ॥१०॥ अथैतदप्यशक्तोसि कर्तुंम
द्योगमाश्रितः ॥ सर्वकर्मफलत्यागंत
तः कुरुयतात्मवान् ॥११॥ श्रेयोहिज्ञान

गी.
।२।
१२

मभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ॥ ध्यानात्क
र्मफलत्यागस्त्यागाच्छांतिरनंतरं ॥ १ ॥ २ ॥ अ
द्वेष्टा सर्वभूतानां मैत्रः करुण एव च ॥ नि-
र्ममो निरहंकारः समदुःखसुखः क्षमी
संतुष्टः सततं योगी यतात्मा दृढनिश्चयः

मय्यर्पितमनोबुद्धिर्योमद्भक्तःसमेप्रियः १४
यस्मान्नोद्विजतेलोकोलोकान्नोद्विजते-
चयः॥ हर्षामर्षभयोद्वेगैर्मुक्तोयःसचमे-
प्रियः॥ १५॥ अनपेक्षःशुचिर्दक्षउदासी-
नोगतव्यथः॥ सर्वारंभपरित्यागीयोमद्भ

गी.

१२२

१२

क्तः समे प्रियः ॥१७॥ यो न हृष्यति न द्वेष्टि न
शोचति न कांक्षति ॥ शुभाशुभपरित्यागी
भक्तिमान्यः समे प्रियः ॥ समः शत्रौ च मि
त्रे च तथा मानावमानयोः ॥ शीतोष्णसुख
दुःखेषु समः संगविवर्जितः ॥१८॥ तुल्य

निंदास्तुतिर्मौनीसंतुष्टोयेनकेनचित् ॥ अ
निकेतःस्थिरमतिर्भक्तिमान्मेप्रियोनरः १९
येतुधर्म्यामृतमिदंयथोक्तंपर्युपासते ॥
श्रद्दधानामत्परमाभक्तास्तेतीवमेप्रियः २०
इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्या

यां योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्ति
योगो नाम द्वादशोऽध्यायः ॥१२॥ अर्जुन उवा
च ॥ ॐ प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव
च ॥ एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च के
शव ॥१॥ श्रीभगवानुवाच ॥ इदं शरीरं कौं

विश्वरूप १२



तेयदेऽभिन्यभियीयते ॥ पनयोवेनिनेशा
हुः देत्वनइनिनहिद: ॥१॥ देत्वतेवापि-
मोविद्धिसर्वदेवेषुभारत ॥ देत्वदेत्व
तयोत्वांनेयनज्ञानेमनेममम ॥२॥ नत्वदेत्वे
यत्वयाहत्वयद्दिकरीयतश्वयन ॥ सत्व

गी.
१२४
१३

योयत्प्रभावश्चतत्समासेनमेशृणु ॥ ऋ
षिभिर्बहुधागीतंछंदोभिर्विविधैःपृ
थक् ॥ ब्रह्मसूत्रपदैश्चैवहेतुमद्भिर्विनि
श्चितैः ॥ ५ ॥ महाभूतान्यहंकारोबुद्धि
रव्यक्तमेवच ॥ इंद्रियाणिदशैकंचपं

चचेंद्रियगोचराः ॥ ६ ॥ इच्छा द्वेषः सुखं दु-
ःखं संघातश्चेतना धृतिः ॥ एतत्क्षेत्रं
समासेन सविकारमुदाहृतम् ॥ ७ ॥ अ
मानित्वमदंभित्वमहिंसा क्षांतिरार्ज-
वम् ॥ आचार्योपासनं शौचं स्थैर्यमा-

गी.
१२५
१३

त्मविनिग्रहः॥७॥इंद्रियार्थेषुवैराग्यमन-
हंकारएवच॥जन्ममृत्युजराव्याधिदुः-
खदोषानुदर्शनम्॥असक्तिरनभिष्वंगः
पुत्रदारगृहादिषु॥नित्यंचसमचित्तत्व
मिष्टानिष्टोपपत्तिषु॥९॥मयिचानन्य-

योगेन भक्तिरव्यभिचारिणी ॥ विविक्तदे
शसेवित्वमरतिर्जनसंसदि ॥११॥ अध्यात्म
ज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ॥ एत-
ज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥१२
ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते

अनादिमत्परंब्रह्मनसत्तन्नासदुच्यते ॥ १२ ॥
सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखं
सर्वतःश्रुतिमल्लोकेसर्वमावृत्यतिष्ठति
सर्वेंद्रियगुणाभासंसर्वेंद्रियविवर्जितं ॥
असक्तंसर्वभृच्चैवनिर्गुणंगुणभोक्तृच ॥

बहिरंतश्चभूतानामचरंचरमेवच ॥ सूक्ष्म
त्वात्तदविज्ञेयंदूरस्थंचांतिकेचतत् ॥ १६ ॥
अविभक्तंचभूतेषुविभक्तमिवचस्थितम्
भूतभर्तृचतज्ज्ञेयंग्रसिष्णुप्रभविष्णुच ॥ १७
ज्योतिषामपितज्ज्योतिःतमसःपरमुच्यते

ज्ञानंज्ञेयंज्ञानगम्यंहृदिसर्वस्यविष्ठितम्
इतिक्षेत्रंतथाज्ञानंज्ञेयंचोक्तंसमासतः ॥
मद्भक्तएतद्विज्ञायमद्भावायोपपद्यते ॥१८
प्रकृतिंपुरुषंचैवविद्ध्यनादीउभावपि ॥
विकारांश्चगुणांश्चैवविद्धिप्रकृतिसंभ॰

वान्॥कार्यकारणकर्तृत्वेहेतुःप्रकृतिरु
च्यते॥पुरुषःसुखदुःखानांभोक्तृत्वेहेतुरु
च्यते॥२०॥पुरुषःप्रकृतिस्थोहिभुंक्तेप्रकृ
तिजान्गुणान्॥कारणंगुणसंगोस्यसद
सद्योनिजन्मसु॥२१॥उपद्रष्टानुमंताचभ

गी.
१२८
१३

र्ताभोक्तामहेश्वरः॥ परमात्मेतिचाप्यु
क्तोदेहेस्मिन्पुरुषःपरः॥२२॥ यएवंवे
त्तिपुरुषंप्रकृतिंचगुणैःसह॥ सर्वथा
वर्तमानोपिनसभूयोभिजायते॥ ध्या
नेनात्मनिपश्यंतिकेचिदात्मानमा

त्मना ॥ अन्येसांख्येनयोगेनकर्मयोगेन
चापरे ॥ २४ ॥ अन्येत्वेवमजानंतःश्रुत्वा
न्येभ्यउपासते ॥ तेपिचातितरंत्येवमृ
त्युंश्रुतिपरायणाः ॥ २५ ॥ यावत्संजाय
तेकिंचित्सत्वंस्थावरजंगमम् ॥ क्षेत्रक्षे

गी.
१५५
१३

ज्ञसंयोगात्तद्विद्धिभरतर्षभ॥२६॥समंस
र्वेषुभूतेषुतिष्ठंतंपरमेश्वरम्॥विनश्य
त्स्वविनश्यंतंयःपश्यतिसपश्यति॥समं
पश्यन्हिसर्वत्रसमवस्थितमीश्वरम्॥न
हिनस्त्यात्मनात्मानंततोयातिपरांगतिं

प्रकृत्यैवचकर्माणिक्रियमाणानिसर्वे
शः॥यःपश्यतितथात्मानमकर्त्तारंस
पश्यति॥२९॥यदाभूतपृथग्भावमेक
स्थमनुपश्यति॥ततएवचविस्तारंब्रह्म
संपद्यतेतदा॥अनादित्वान्निर्गुणत्वात्

रमात्मायमव्ययः॥ शरीरस्थोपिकौंतेयन
करोतिनलिप्यते॥३२॥ यथासर्वगतंसौ
क्ष्यादाकाशंनोपलिप्यते॥ सर्वत्राव
स्थितोदेहेतथात्मानोपलिप्यते॥३३॥य
थाप्रकाशयत्येकःकृत्स्नंलोकमिमंर

वि: ॥ क्षेत्रंक्षेत्रीतथाकृत्स्नंप्रकाशय
ति भारत ॥ ३३ ॥ क्षेत्रक्षेत्रज्ञयोरेवमंतरं
ज्ञानचक्षुषा ॥ भूतप्रकृतिमोक्षंचयेवि
दुर्यांतितेपरम् ॥ ३४ ॥ इतिश्रीभगवद्गी
तासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रे

श्रीकृष्णार्जुनसंवादे क्षेत्रक्षेत्रज्ञनिर्देशोना
म त्रयोदशोध्यायः ॥ १३ ॥ श्रीभगवानुवाच ॥
ॐ परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्त
मम् ॥ यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमि
तो गताः ॥ १ ॥ इदं ज्ञानमुपाश्रित्य मम सा

रासमण्डल १२



धर्म्यमागताः॥ सर्गेपिनोपजायंतेप्रलये
नव्यथंतिच ॥२॥ ममयोनिर्महद्ब्रह्मतस्मि
न्गर्भंदधाम्यहम्॥ संभवःसर्वभूतानांत
तोभवतिभारत ॥३॥ सर्वयोनिषुकौंतेय
मूर्तयःसंभवंतियाः॥ तासांब्रह्ममहद्

गी.
१३२
१७

योनिरहंबीजप्रदःपिता ॥४॥ सत्वंरजस्त
मइतिगुणाःप्रकृतिसंभवाः ॥ निबध्नं
तिमहाबाहोदेहेदेहिनमव्ययम् ॥५
तत्रसत्वंनिर्मलत्वात्प्रकाशकमनामयं
सुखसंगेनबध्नातिज्ञानसंगेनचानघ ॥

रजोरागात्मकंविद्धितृष्णासंगसमुद्भवं
तन्निबध्नातिकौंतेयकर्मसंगेनदेहिनं ॥ ७
तमस्त्वज्ञानजंविद्धिमोहनंसर्वदेहिनां
प्रमादालस्यनिद्राभिस्तन्निबध्नातिभारत ८
सत्वंसुखेसंजयतिरजःकर्मणिभारत ॥

ज्ञानमावृत्यतुतमःप्रमादेसंजयत्युत ॥ ९
रजस्तमश्चाभिभूयसत्वंभवतिभारत ॥ र
जःसत्वंतमश्चैवतमःसत्वंरजस्तथा ॥ सर्व
द्वारेषुदेहेस्मिन्प्रकाशउपजायते ॥ ज्ञानं
यदातदाविद्याद्विवृद्धंसत्वमित्युत ॥ ११ ॥ लो

भःप्रवृत्तिरारंभःकर्मणामशमःस्पृहा ।
रजस्येतानिजायंतेविवृद्धेभरतर्षभ ॥१२॥
अप्रकाशोप्रवृत्तिश्चप्रमादोमोहएवच ।
तमस्येतानिजायंतेविवृद्धेकुरुनंदन ॥१३॥
यदासत्वेप्रवृद्धेतुप्रलयंयातिदेहभृत् ।

गी.
अ १४
१८

तदोत्तमविदांलोकानमलान्प्रतिपद्यते ॥१

रजसिप्रलयंगत्वाकर्मसंगिषुजायते ॥ त

थाप्रलीनस्तमसिमूढयोनिषुजायते ॥१५

कर्मणःसुकृतस्याहुःसात्विकंनिर्मलंफ

लं॥ रजसस्तुफलंदुःखमज्ञानंतमसःफलं

सत्वात्संजायतेज्ञानंरजसोलोभएवच ॥ प्र
मादमोहौतमसोभवतोज्ञानमेवच ॥ १७ ॥
ऊर्ध्वंगच्छंतिसत्वस्थामध्येतिष्ठंतिराजसाः
जघन्यगुणवृत्तिस्थाअधोगच्छंतितामसाः ८
नान्यंगुणेभ्यःकर्तारंयदाद्रष्टानुपश्यति

गुणेभ्यश्चपरंवेत्तिमद्भावंसोधिगच्छति॥
गुणानेतानतीत्यत्रीन्देहीदेहसमुद्भवा-
न्॥जन्ममृत्युजरादुःखैर्विमुक्तोमृतम
श्नुते॥२०॥अर्जुनउवाच॥कैर्लिंगैस्त्रीन्गु
णानेतानतीतोभवतिप्रभो॥किमाचा

ः कथंचैतांस्त्रीन्गुणानतिवर्तते ॥२१॥ श्री
भगवानुवाच ॥ प्रकाशंचप्रवृत्तिंचमोहमे
वचपांडव ॥ नद्वेष्टिसंप्रवृत्तानिननिवृत्ता
निकांक्षति ॥२२॥ उदासीनवदासीनोगुणै
र्योनविचाल्यते ॥ गुणावर्तंतइत्येवयो

गी.
१४
१७

वतिष्टतिनेंगते ॥२३॥ समदुःखसुखःस्वस्थः
समलोष्टाश्मकांचनः ॥ तुल्यप्रियाप्रियो॰
धीरस्तुल्यनिंदात्मसंस्तुतिः ॥ मानापमा॰
नयोस्तुल्यस्तुल्योमित्रारिपक्षयोः ॥ सर्वा
रंभपरित्यागीगुणातीतःसउच्यते ॥२५॥

मांचयोऽव्यभिचारेणभक्तियोगेनसेवते॥
सगुणान्समतीत्यैतान्ब्रह्मभूयायकल्पते १८
ब्रह्मणोहिप्रतिष्ठाहममृतस्याव्ययस्य
च॥शाश्वतस्यचधर्मस्यसुखस्यैकांतिक
स्यच॥२७॥इतिश्रीभगवद्गीतासूपनिषत्सु

गी.
अ१
१४

ब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसं
वादेगुणत्रयविभागोनामचतुर्दशोध्यायः
श्रीभगवानुवाच ॥ ॐ ऊर्ध्वमूलमधःशा
खमश्वत्थंप्राहुरव्ययम् ॥ छंदांसियस्यप
र्णानियस्तंवेदसवेदवित् ॥१॥ अधश्चोर्ध्वं



प्रवृत्तात्तस्यश्यावागुणग्रहृद्धाविमय
प्रबालाः ॥ अथ स्वन्दूलान्पगुसेननानिक
मोत्तुवेयीतिमनुष्यलोके ॥ १ ॥ नदृपमसे
हनयोपलभ्यतेनोनोनयवादिनेवमसेप्र-
तिष्ठा ॥ स्वस्पयमेनेसविहूढन्मूलमसे-

गी.
३५
१५

गशस्त्रेण दृढेन छित्वा ॥ ३ ॥ ततःपदंत
त्परिमार्गितव्यं यस्मिन्गता नःनिवर्त्ते
न्ति भूयः ॥ तमेव चाद्यं पुरुषं प्रपद्ये यतः
प्रवृत्तिः प्रसृता पुराणी ॥ ४ ॥ निर्मानमो
हा जितसंगदोषा अध्यात्मनित्या विनि

वृत्तकामाः ॥ द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञै
र्गच्छंत्यमूढाः पदमव्ययं तत् ॥ ५ ॥ न तद्भा
सयते सूर्यो न शशांको न पावकः ॥ यद्ग
त्वा न निवर्तंते तद्धाम परमं मम ॥ ६ ॥ ममै
वांशो जीवलोके जीवभूतः सनातनः ॥

गी.
१३९
१५

मनःषष्ठानींद्रियाणिप्रकृतिस्थानिकर्ष
ति॥७॥शरीरंयदवाप्नोतियच्चाप्युत्क्राम
तीश्वरः॥गृहीत्वैतानिसंयातिवायुर्गंधा
निवाशयात्॥८॥श्रोत्रंचक्षुःस्पर्शनं
चरसनंघ्राणमेवच॥अधिष्ठायमनश्चा

यं विषयानुपसेवते ॥ ९ ॥ उत्क्रामंतं स्थि-
तं वापि भुंजानं वा गुणान्वितम् ॥ विमू-
ढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः ॥ १०
यतंतो योगिनश्चैनं पश्यंत्यात्मन्यवस्थि-
तम् ॥ यतंतोप्यकृतात्मानो नैनं पश्यंत्य

गी.
१५०
१५

चेतसः ॥ ११ ॥ यदादित्यगतं तेजो जगद्भासय
तेखिलम् ॥ यच्चंद्रमसि यच्चाग्नौ तत्तेजो वि
द्धि मामकम् ॥ गामाविश्य च भूतानि धा
रयाम्यहमोजसा ॥ पुष्णामि चौषधीः सर्वाः
सोमो भूत्वा रसात्मकः ॥ १३ ॥ अहं वैश्वान-

रो भूत्वा प्राणिनां देहमाश्रितः ॥ प्राणापान
समायुक्तः पचाम्यन्नं चतुर्विधम् ॥१४॥ स
र्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञा
नमपोहनं च ॥ वेदैश्च सर्वैरहमेव वेद्यो वे
दांतकृद्वेदविदेव चाहम् ॥१५॥ द्वाविमौ

गी.
१५।
१५

पुरुषौ लोके क्षरश्चाक्षर एव च ॥ क्षरः सर्वा
णि भूतानि कूटस्थोक्षर उच्यते ॥१६॥ उत्त
मः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ॥ यो
लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥१७॥
यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः ॥

अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः॥ ए
योमामेवमसंमूढोजानातिपुरुषोत्तमम्
ससर्वविद्भजतिमांसर्वभावेनभारत॥इति
गुह्यतमंशास्त्रमिदमुक्तंमयानघ॥एतत्
बुद्ध्वाबुद्धिमान्स्यात्कृतकृत्यश्चभारत॥२०

गी.

१५

इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायां
योगशास्त्रेश्रीकृष्णार्जुनसंवादेपुरुषोत्तम
योगोनामपंचदशोऽध्यायः ॥ १५ ॥ श्रीभगवा
नुवाच ॥ अभयंसत्वसंशुद्धिर्ज्ञानयोगव्य
वस्थितिः ॥ दानंदमश्चयज्ञश्चस्वाध्यायस्त



पआर्जवम् ॥ अहिंसासत्यमक्रोधस्त्या
गः शांतिरपैशुनम् ॥ दयाभूतेष्वलोलत्व
मार्दवंह्रीरचापलम् । तेजःक्षमाधृतिः
शौचमद्रोहोनातिमानिता ॥ भवंतिसंप
दंदैवीमभिजातस्यभारत ॥ ३ ॥ दंभोदर्पो

भिमानश्चक्रोधःपारुष्यमेवच ॥ अज्ञानं
चाभिजातस्यपार्थसंपदमासुरीम् ॥४॥
दैवीसंपद्विमोक्षायनिबंधायासुरीमता
माशुचःसंपदंदैवीमभिजातोसिपांडव ॥
द्वौभूतसर्गौलोकेस्मिन्दैवआसुरएवच

दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ६
प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ॥
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ ७
असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ॥
अपरस्परसंभूतं किमन्यत्कामहैतुकम् ८

गी.
[illegible]
१६

एतांदृष्टिमवष्टभ्यनष्टात्मानोल्पबुद्धयः
प्रभवंत्युग्रकर्माणःक्षयायजगतोहि
ताः॥९॥काममाश्रित्यदुष्पूरंदंभमानम
दान्विताः॥मोहाद्गृहीत्वासद्ग्राहान्प्रव-
र्तंतेशुचिव्रताः॥१०॥चिंतामपरिमेयांच

प्रलयांतामपाश्रिताः ॥ कामोपभोगपर
मा एतावदिति निश्चिताः ॥११॥ आशापा
शशतैर्बद्धाः कामक्रोधपरायणाः ॥ ई
हंते कामभोगार्थमन्यायेनार्थसंचया
न् ॥१२॥ इदमद्य मया लब्धमिमं प्राप्स्ये म

गी.
१८५
१६

नोरथम्॥ इदमस्तीदमपिमे भविष्यतिपुन-
र्धनम्॥१३॥ असौमयाहतःशत्रुर्हनिष्येचा-
परानपि॥ ईश्वरोहमहंभोगीसिद्धोहंबल-
वान्सुखी॥१४॥ आढ्योभिजनवानस्मि
कोन्योस्तिसदृशोमया॥ यक्ष्येदास्यामि-

मोदिष्य इत्यज्ञानविमोहिताः ॥ ५ ॥ अने·
कचित्तविभ्रांता मोहजालसमावृताः ॥ प्र
सक्ताः कामभोगेषु पतंति नरकेऽशुचौ ॥ ६ ८
आत्मसंभाविताः स्तब्धा धनमानमदा·
न्विताः ॥ यजंते नामयज्ञैस्ते दंभेनाविधि

पूर्वकम् ॥ १७ ॥ अहंकारं बलं दर्पं कामं क्रो-
धं च संश्रिताः ॥ मामात्मपरदेहेषु प्रद्विषं-
तोऽभ्यसूयकाः ॥ तानहं द्विषतः क्रूरान्सं-
सारेषु नराधमान् ॥ क्षिपाम्यजस्रमशुभा-
नासुरीष्वेव योनिषु ॥ १९ ॥ आसुरीं योनिमा-

पन्नामूढाजन्मनिजन्मनि ।। मामप्राप्यैव
कौंतेयततोयांत्यधमांगतिम् ।।२०।। त्रिवि
धंनरकस्येदंद्वारंनाशनमात्मनः ।। का
मःक्रोधस्तथालोभस्तस्मादेतत्त्रयंत्यजे
त् ।।२१।। एतैर्विमुक्तःकौंतेयतमोद्वारैस्त्रिभि

भिर्नरः ॥ आचरत्यात्मनः श्रेयस्ततो याति प
रांगतिम् ॥ २२ ॥ यः शास्त्रविधिमुत्सृज्य व
र्तते कामकारतः ॥ न स सिद्धिमवाप्नोति न
सुखं न परांगतिम् ॥ २३ ॥ तस्माच्छास्त्रं प्रमा
णं ते कार्याकार्यव्यवस्थितौ ॥ ज्ञात्वा शास्त्र

विधानोक्तंकर्मकर्त्तुमिहार्हसि ॥२४॥ इति

श्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयो

गशास्त्रेश्रीकृष्णार्जुनसंवादेदैवासुरसंप

त्तियोगोनामषोडशोध्यायः ॥१६॥ अर्जुन

उवाच ॥ ऊँयेशास्त्रविधिमुत्सृज्ययजंते

श्रद्धयान्विताः ॥ तेषांनिष्ठानुकाकृष्णसत्व
माहोरजस्तमः ॥१॥ श्रीभगवानुवाच ॥ त्रि
विधाभवतिश्रद्धादेहिनांसास्वभावजा ॥
सात्विकीराजसीचैवतामसीचेतितांशृणु
सत्वानुरूपासर्वस्यश्रद्धाभवतिभारत ॥ श्र



कालेनाग १६



द्धामयोयंपुरुषोयोयच्छ्रद्धःसएवसः॥३॥
यजंतेसात्विकादेवान्यक्षरक्षांसिराजसः
प्रेतान्भूतगणांश्चान्येयजंतेतामसाजनाः ४
अशास्त्रविहितंघोरंतप्यंतेयेतपोजनाः
दंभाहंकारसंयुक्ताःकामरागबलान्वि

ताः ॥५॥ कर्षयंतः शरीरस्थं भूतग्राममचे
तसः ॥ मां चैवांतःशरीरस्थं तान्विद्ध्या
सुरनिश्चयान् ॥ आहारस्त्वपि सर्वस्य त्रि
विधो भवति प्रियः ॥ यज्ञस्तपस्तथादा
नं तेषां भेदमिमं शृणु ॥७॥ आयुःसत्वब

लारोग्यसुखप्रीतिविवर्धनाः ॥ रस्याः
स्निग्धाः स्थिरा हृद्या आहाराः सात्विक
प्रियाः ॥८॥ कट्वम्ललवणात्युष्णतीक्ष्ण
रूक्षविदाहिनः ॥ आहारा राजसस्येष्टा
दुःखशोकामयप्रदाः ॥९॥ यातयामं

गतरसंपूतिपर्युषितंचयत्॥ उच्छिष्टमपि
चामेध्यंभोजनंतामसप्रियम्॥१०॥ अफला
कांक्षिभिर्यज्ञोविधिदृष्टोयइज्यते॥ यष्ट-
व्यमेवेतिमनःसमाधायससात्विकः॥११॥
अभिसंधायतुफलंदंभार्थमपिचैवयत्॥

इज्यते भरतश्रेष्ठं तं यज्ञं विद्धि राजसम् ॥१२
विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणं ॥
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ दे
वद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ॥ ब्र
ह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ १४

गी.
१५।
१७

अनुद्वेगकरंवाक्यंसत्यंप्रियहितंचयत्।
स्वाध्यायाभ्यसनंचैववाङ्मयंतपउच्यते
मनःप्रसादःसौम्यत्वंमौनमात्मविनिग्र-
हः।भावसंशुद्धिरित्येतत्तपोमानसमुच्यते
श्रद्धयापरयातप्तंतपस्तत्त्रिविधंनरैः॥

अफलाकांक्षिभिर्युक्तैःसात्विकंपरिचक्ष
ते॥१७॥सत्कारमानपूजार्थंतपोदंभेनचैव
यत्॥क्रियतेतदिहप्रोक्तंराजसंचलमध्रु
वम्॥१८॥मूढग्राहेणात्मनोयत्पीडयाक्रि
यतेतपः॥परस्योत्सादनार्थंवातत्तामसम्·

गी.
५१
१७

मुदाहृतम॥१९॥ दातव्यमितियद्दानंदीयते
नुपकारिणे॥ देशेकालेचपात्रेचतद्दानंसा
त्विकंस्मृतम॥ यत्तुप्रत्युपकारार्थंफ
लमुद्दिश्यवापुनः॥ दीयतेचपरिक्लिष्टंत
द्राजसमुदाहृतम॥२१॥ अदेशकालेयद्दा

नमपात्रेभ्यश्चदीयते॥ असत्कृतमवज्ञातं
तत्तामसमुदाहृतम्॥२२॥ ॐतत्सदितिनि
र्देशोब्रह्मणस्त्रिविधःस्मृतः॥ ब्राह्मणा
स्तेनवेदाश्चयज्ञाश्चविहिताःपुरा॥२३॥त
स्मादोमित्युदाहृत्ययज्ञदानतपःक्रियाः

प्रवर्तंतेविधानोक्ताःसततंब्रह्मवादिनां
तदित्यनभिसंधायफलंयज्ञतपःक्रिया
दानक्रियाश्चविविधाःक्रियंतेमोक्षकां
क्षिभिः॥२५॥सद्भावेसाधुभावेचसदित्ये
तत्प्रयुज्यते॥प्रशस्तेकर्मणितथासच्छ

ब्दःपार्थयुज्यते॥२६॥यज्ञेतपसिदानेच
स्थितिःसदितिचोच्यते॥कर्मचैवतदर्थी
यंसदित्येवाभिधीयते॥अश्रद्धयाहुतंद
त्तंतपस्तप्तंकृतंचयत्॥असदित्युच्यतेपा
र्थनचतत्प्रेत्यनोइह॥२८॥इतिश्रीभग

गी.
१५४
१७

वद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशा
स्त्रेश्रीकृष्णार्जुनसंवादेत्रिविधश्रद्धायो
गोनामसप्तदशोऽध्यायः ॥ १७ ॥ अर्जुनउवा
च ॥ ॐ संन्यासस्यमहाबाहोतत्त्वमिच्छा
मिवेदितुम् ॥ त्यागस्यचहृषीकेशपृ

थक्केशिनिषूदन ॥१॥ श्रीभगवानुवाच ॥
काम्यानां कर्मणां न्यासं संन्यासं कवयो
विदुः ॥ सर्वकर्मफलत्यागं प्राहुस्त्यागं
विचक्षणाः ॥२॥ त्याज्यं दोषवदित्येके
कर्म प्राहुर्मनीषिणः ॥ यज्ञदानतपः

गी.
१५५

कर्मनत्याज्यमितिचापरे॥३॥निश्चयंशृणुमे
तत्रत्यागेभरतसत्तम॥त्यागोहिपुरुषव्या-
घ्रःत्रिविधःसंप्रकीर्तितः॥यज्ञदानतपः
कर्मनत्याज्यंकार्यमेवतत्॥यज्ञोदानंतप
श्चैवपावनानिमनीषिणाम्॥५॥एतान्यपि

तु कर्माणि संगं त्यक्त्वा फलानि च ॥ कर्तव्या
नीति मे पार्थ निश्चितं मतमुत्तमम् ॥ ६ ॥ निय
तस्य तु संन्यासः कर्मणो नोपपद्यते ॥ मोहा
त्तस्य परित्यागस्तामसः परिकीर्तितः ॥ दुः
खमित्येव यत्कर्म कायक्लेशभयात्त्यजेत

गी.
१५८

सकृत्वाराजसंत्यागंनैवत्यागफलंलभेत्॥
कार्यमित्येवयत्कर्मनियतंक्रियतेर्जुन॥ सं
गंत्यक्त्वाफलंचैवसत्यागःसात्विकोमतः॥
नद्वेष्ट्यकुशलंकर्मकुशलेनानुषज्जते॥ त्या
गीसत्वसमाविष्टोमेधावीछिन्नसंशयः॥

नहिदेहभृताशक्यंत्यक्तुंकर्माण्यशेषतः
यस्तुकर्मफलत्यागीसत्यागीत्यभिधीयते ॥
अनिष्टमिष्टंमिश्रंचत्रिविधंकर्मणःफल
भवत्यत्यागिनांप्रेत्यनतुसंन्यासिनांक्वचि
त् ॥ १२ ॥ पंचैतानिमहाबाहोकारणानिनि

वी.
५८

वेयमे॥सोव्वेकूतोतेप्रोकानिसिद्वयेम
वेकमेणाम॥३॥श्रविह्याणेतथाकतोकव
णंचहप्पविवयम॥विवियाष्ठपष्पकेह्या·
देवंवैवाउपंचमम॥४॥सावीरवाञ्चनेतामि
येकमेश्राउभनेनरः॥व्यायेवाविपरीतेवा

पंचैतेतस्यहेतवः॥१५॥तत्रैवंसतिकर्तारं
मात्मानंकेवलंतुयः॥पश्यत्यकृतबुद्धि
त्वान्नसपश्यतिदुर्मतिः॥१६॥यस्यनाहंकृतो
भावोबुद्धिर्यस्यनलिप्यते॥हत्वापिसइमां
ल्लोकान्नहंतिननिबध्यते॥१७॥ज्ञानंज्ञेयं

गी.
१८५

परिज्ञाता त्रिविधा कर्म्मचोदना ॥ करणं
कर्म्म कर्त्तेति त्रिविधः कर्म्मसंग्रहः ॥ १८ ॥
ज्ञानं कर्म्म च कर्त्ता च त्रिधैव गुणभेदतः
प्रोच्यते गुणसंख्याने यथावच्छृणु ता
न्यपि ॥ सर्व्वभूतेषु येनैकं भावमव्ययमी

क्षते॥ अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सा
त्विकम्॥ २०॥ पृथक्त्वेन तु यज्ज्ञानं ना
नाभावान्पृथग्विधान्॥ वेत्ति सर्वेषु भू
तेषु तज्ज्ञानं विद्धि राजसम्॥ २१॥ यत्तु कृ
त्स्नवदेकस्मिन्कार्ये सक्तमहेतुकम

गी.
१५५

अतत्वार्थवदल्पंचतत्तामसमुदाहृतम् ॥२२

नियतंसंगरहितमरागद्वेषतःकृतम् ॥अ

फलप्रेप्सुनाकर्मयत्तत्सात्विकमुच्यते ॥२

यत्तुकामेप्सुनाकर्मसाहंकारेणवापुनः

क्रियतेबहुलायासंतद्राजसमुदाहृतं ॥

श्रुबेयंत्नथेहिंसाममनवेदावपौलसम॥
मोहादाभनेकर्मंयन्नाममसस्याने॥१५
बक्रेमोनहेवादीयत्नमाहसमन्वितः
मिथ्यामिथ्योनिर्विकारःकर्त्तामाविकउच्य
ते॥१६॥गानीकर्मंफलप्रेफलंडोहिंसाम

गी.
८०

कोशुचिः॥ हर्षशोकान्वितः कर्त्ता राजसः
परिकीर्त्तितः॥२७॥ अयुक्तः प्राकृतः स्तब्धः
शठो नैष्कृतिकोलसः॥ विषादी दीर्घसूत्री
च कर्त्ता तामस उच्यते॥२८॥ बुद्धेर्भेदं धृतेश्चै
व गुणतस्त्रिविधं शृणु॥ प्रोच्यमानमशेषे

ाशेषपृथक्केनधनंजय ॥२९॥ प्रवृत्तिंचनिवृत्तिं
चकार्याकार्येभयाभये ॥ बंधंमोक्षंचयावे
त्तिबुद्धिःसापार्थसात्विकी ॥३०॥ ययाधर्मम
धर्मंचकार्यंचाकार्यमेवच ॥ अयथाव
त्प्रजानातिबुद्धिःसापार्थराजसी ॥३१॥ अ

धर्मं धर्ममिति या मन्यते तमसावृता ॥ स
र्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ ताम·
सी ॥३२॥ धृत्या यया धारयते मनः प्राणें
द्रियक्रियाः ॥ योगेनाव्यभिचारिण्या धृ
तिः सा पार्थ सात्विकी ॥३३॥ यया तु धर्म

कामार्थान्धृत्या धारयतेऽर्जुन ॥ प्रसंगेन-
फलाकांक्षी धृतिः सा पार्थ राजसी ॥ ३४
यया स्वप्नं भयं शोकं विषादं मदमेव च
न विमुंचति दुर्मेधा धृतिः सा पार्थ ताम-
सी ॥ ३५ ॥ सुखं त्विदानीं त्रिविधं शृणु मे

सी.
९२

भरनषंम ॥ अम्मासाइमनेयउडुःखोतं
वनिवाक्कति ॥ २६ ॥ यन्नदयेविषमितप·
रिणामेम्हनोयममम ॥ तन्त्हाखंमाविकेप्रे
कमात्मवुद्धिप्रमादजम्म ॥ २७ ॥ विषयेंद्रि
यमेयोगाघनदयेम्हनोयममम ॥ परिणा

मेविषमिवतत्सुखंराजसंस्मृतम्॥३८॥य
दग्रेचानुबंधेचसुखंमोहनमात्मनः॥नि
द्रालस्यप्रमादोत्थंतत्तामसमुदाहृतं॥न.
नतदस्तिपृथिव्यांवादिविदेवेषुवापुनः॥स
त्वंप्रकृतिजैर्मुक्तंयदेभिःस्यात्त्रिभिर्गुणैः ५.

ब्राह्मणक्षत्रियविशांशूद्राणांचपरंतप॥क
र्माणिप्रविभक्तानिस्वभावप्रभवैर्गुणैः॥श
मोदमस्तपःशौचंक्षांतिरार्जवमेवच॥ज्ञा
नंविज्ञानमास्तिक्यंब्रह्मकर्मस्वभावजम्
शौर्यंतेजोधृतिर्दाक्ष्यंयुद्धेचाप्यपलायनं॥

दानमीश्वरभावश्च क्षात्रंकर्मस्वभावजम् ४३

कृषिगोरक्ष्यवाणिज्यं वैश्यकर्मस्वभावजं ।

परिचर्यात्मकंकर्म शूद्रस्यापिस्वभावजं ४४

स्वेस्वेकर्मण्यभिरतः संसिद्धिंलभतेनरः ।

स्वकर्मनिरतः सिद्धिंयथाविंदतितच्छृणु ४५

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं ॥ स्व
कर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः
श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठि
तात् ॥ स्वभावनियतं कर्म कुर्वन्नाप्नोति कि
ल्बिषम् ॥ ४७ ॥ सहजं कर्म कौंतेय सदोष

मपिनत्यजेत ॥ सर्वारंभाहिदोषेणधूमेना
ग्निरिवावृताः ॥ ४८ ॥ असक्तबुद्धिःसर्वत्र
जितात्माविगतस्पृहः ॥ नैःकर्म्यसिद्धिंप
रमांसंन्यासेनाधिगछति ॥ ४९ ॥ सिद्धिंप्रा
प्तोयथाब्रह्मतथाप्नोतिनिबोधमे ॥ समा

गी.
१८५

सेनैवकौंतेयनिष्ठाज्ञानस्ययापरा॥५०॥बु
द्ध्याविशुद्धयायुक्तोधृत्यात्मानंनियम्यच
शब्दादीन्विषयांस्त्यक्त्वारागद्वेषौव्युद
स्यच॥५१॥विविक्तसेवीलघ्वाशीयतवा
क्कायमानसः॥ध्यानयोगपरोनित्यंवै

ग्यं समनुपाश्रितः ॥५२॥ अहंकारं बलं
दर्पं कामं क्रोधं परिग्रहम् ॥ विमुच्य नि
र्ममः शान्तो ब्रह्मभूयाय कल्पते ॥ ब्रह्म
भूतः प्रसन्नात्मा न शोचति न कांक्षति
समः सर्वेषु भूतेषु मद्भक्तिं लभते परां ५५

भक्त्यामामभिजानातियावन्यश्चास्मित
त्वतः॥ ततोमांतत्वतोज्ञात्वाविशतेतद
नंतरम्॥५५॥सर्वकर्माण्यपिसदाकुर्वा
णोमद्व्यपाश्रयः॥ मत्प्रसादादवाप्नोति
शाश्वतंपदमव्ययम्॥ चेतसासर्वकर्मा

णिमयिसंन्यस्यमत्परः ॥ बुद्धियोगमुपा
श्रित्यमच्चित्तःसततंभव ॥ ५७ ॥ मच्चित्तःस
र्वदुर्गाणिमत्प्रसादात्तरिष्यसि ॥ अथचे
त्त्वमहंकारान्नश्रोष्यसिविनंक्ष्यसि ॥ ५८
यदहंकारमाश्रित्यनयोत्स्यइतिमन्यसे

गी.
१९७

मिथ्यैव व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥५९॥ स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा ॥ कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोपि तत् ॥६०॥ ईश्वरः सर्वभूतानां हृद्देशेर्जुन तिष्ठति ॥ भ्रामयन्सर्वभूतानि यंत्रा

ढानि मायया ॥६१॥ तमेव शरणं गच्छ सर्व
भावेन भारत ॥ तत्प्रसादात्परां शांतिं स्थानं
प्राप्स्यसि शाश्वतम् ॥ इति ते ज्ञानमाख्यातं
गुह्याद्गुह्यतरं मया ॥ विमृश्यैतदशेषेण य
थेच्छसि तथा कुरु ॥६३॥ सर्वगुह्यतमं भूयः

गी.
६५

सृणुमेपरमंवचः॥ इष्टोसिमेदृढमितिततो
वक्ष्यामितेहितम्॥६४॥मन्मनाभवमद्भक्तो
मद्याजीमांनमस्कुरु॥मामेवैष्यसिसत्यंते
प्रतिजानेप्रियोसिमे॥६५॥सर्वधर्मान्परि
त्यज्यमामेकंशरणंव्रज॥ अहंत्वांसर्वपापे

भ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥ इदं ते नात
पस्काय नाभक्ताय कदाचन ॥ न चाशुश्रूष
वे वाच्यं न च मां योभ्यसूयति ॥ य इदं परमं
गुह्यं मद्भक्तेष्वभिधास्यति ॥ भक्तिं मयि परां
कृत्वा मामेवैष्यत्यसंशयः ॥ ६८ ॥ न च तस्मा

न्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ॥ भविता न
च मे तस्मादन्यः प्रियतरो भुवि ॥ अध्येष्यते
च य इमं धर्म्यं संवादमावयोः ॥ ज्ञानयज्ञे
न तेनाहमिष्टः स्यामिति मे मतिः ॥ ७० ॥ श्र
द्धावाननसूयश्च शृणुयादपि यो नरः ॥

सोपि मुक्तः शुभांल्लोकान्प्राप्नुयात्पुण्यक
र्मणां ॥ कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण
चेतसा ॥ कच्चिदज्ञानसंमोहः प्रणष्टस्ते·
धनंजय ॥ ७२ ॥ अर्जुन उवाच ॥ नष्टो मोहः
स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ॥ स्थि

गी.
८०

तोस्मिगतसंदेहःकरिष्येवचनंतव ॥७३॥सं
जयउवाच॥ इत्यहंवासुदेवस्यपार्थस्यचमहा
त्मनः॥ संवादमिममश्रौषमद्भुतंरोमहर्ष
णं॥ व्यासप्रसादात्श्रुतवानेतद्गुह्यमहंप
रं॥ योगंयोगेश्वरात्कृष्णात्साक्षात्कथयतः

स्वयं ॥ राजन्संस्मृत्य संस्मृत्य संवादमिमम·
द्भुतं ॥ केशवार्जुनयोः पुण्यं हृष्यामि च·
मुहुर्मुहुः ॥ ७६ ॥ तच्च संस्मृत्य संस्मृत्य रूप
मत्यद्भुतं हरेः ॥ विस्मयो मे महान्राजन्हृ
ष्यामि च पुनः पुनः ॥ यत्र योगेश्वरः कृष्णो

यत्रपार्थोधनुर्धरः ॥ तत्रश्रीर्विजयोभूतिर्ध्रु
वानीतिर्मतिर्मम ॥ ७८ ॥ इतिश्रीमहाभारतेश
तसाहस्र्यांसंहितायांवैय्यासिक्यांभीष्मपर्वणि
श्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशा
स्त्रेश्रीकृष्णार्जुनसंवादेमोक्षसंन्यासयोगोना

एवंभगव

